015:1G72
G0

MUL
064318

RATHNAM PRESS
BINDERS
BADRIAN STREET
MADRAS.

**Madras University Library.**

Call Number 015: IG72 GO

Accession Number 64318

Available for loan from

This book should be returned on or before the date last marked below.

O. 61

TRIVANDRUM SANSKRIT SERIES.

No. CIII.

Śrī Setu Lakṣmī Prasādamālā.

No. XV.

UNIVERSITY LIBRARY
4 SEP. 1931
MADRAS

# THE HAMSASANDEŚA WITH COMMENTARY

EDITED BY

K. SĀMBAŚIVA ŚĀSTRI,

*Curator of the Department for the Publication of Sanskrit Manuscripts, Trivandrum.*

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HER HIGHNESS THE MAHARANI REGENT OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1930.

*All Rights Reserved.)*

64318
8310
015:1G72
G0

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १०३.

श्रीसेतुलक्ष्मीप्रसादमाला ।

ग्रन्थाङ्कः १५.

UNIVERSITY ... -4 SEP. 1931 ... MADRAS

# हंससन्देशः

सव्याख्यः

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
के. साम्बशिवशास्त्रिणा
संशोधितः ।

स च
अनन्तशयने
महामहिमश्रीसेतुलक्ष्मीमहाराज्ञीशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितः ।

कोलम्बाब्दाः ११०५, क्रैस्ताब्दाः १९३०.

॥ श्रीः ॥

श्रीपद्मनाभसेवि-
न्यखिलश्रीवर्धनी महाराज्ञी ।
श्रीसेतुलक्ष्म्यभिख्या
प्रत्यक्षा जयति विश्वभूलक्ष्मीः ॥

ग्रन्थावलिरियमिन्धे
प्रसाधिता तत्प्रसादगुणगुम्फा ।
श्रीसहितसेतुलक्ष्मी-
प्रसादमाला सुवर्णमणिचित्रा ॥

UNIVERSITY LIBRARY
-4 SEP. 1931
MADRAS

# INTRODUCTION.

This is a rare Śandeśakāvya with an equally rare commentary written in metrical form. The subject matter of the work in brief is this :— A certain Śaiva devotee who had been in enjoyment of Advaitānanda resulting from his happy union with Bhakti as his inseparable consort was, from the effect of his previous Karma, forced to be separated from his beloved spouse. The pang of separation making his life unbearable, he yearns to be united once again with Bhakti. He then makes a Hamsa (swan) of his own mind, and sends through it a message of love to his beloved who is living far away in the abode of Śiva. At the very outset of the work, the author attributes the illusion caused by the attachment towards worldly affairs as the reason for the separation,

> "कश्चिन्मायामृगवशगतः कर्मणा मुह्यमानो
> भक्त्या शम्भोश्चरणभवया विप्रयुक्तो विषण्णः ।" (p. 1).

and consistently finishes the work by mentioning non-attachment towards Karma as the cause of reunion with Bhakti thus :—

> "सञ्छिद्याहं मम तदिदमित्यादिसंसारपाशान्
> स्वैरं लोके विहर सुचिरं कर्मलेपैरलिप्तः ।" (p. 39).

This consistency holds good not only in the case of प्रस्तुत (that which is under consideration) but also of what is अप्रस्तुत, in as much as the introductory verse refers to the resemblance of Rāma's separation from Sītā,

> "रामो यद्वज्जनकसुतया दण्डकारण्यभूमौ
> क्षेत्रे प्राप्ते क्वचन पुरुषः कल्पयामास वासम् ।" (p. 1).

and the concluding verse alludes to the likeness of Rāma's recovery of Sītā,

> "कामं हत्वा बहुमुखमथ प्रेयसीं तामवाप्स्ये
> यद्वत् पूर्वं रघुकुलपतिर्मैथिलीं मान्यशीलाम् ।" (p. 38).

It is well-known that the Sandeśakāvyas trace their origin to the incident of Rāma's sending a message to Sīta through Hanuman as depicted in the Rāmāyaṇa of Vālmīki and take for their model the Meghasandeśa of Kālidāsa. The author of the present work appears to be an adherent of this view when he makes explicit reference to Rāma's message in the verse,

"क्षेत्रे तस्मिन् सह विहरतामिन्द्रियाणां मृगाणां
कृत्वा तृप्तिं विषयकबलैर्यापयित्वा दिनानि ।
संसाराब्धेः प्रतरणविधावाज्ञनेयं यथान्यं
हंसं कञ्चित् सहचरमसौ मानसस्थं ददर्श ॥" (p. 2).

and also when he modifies the verse of Kālidāsa,

"त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥"
(Uttaramegha, slo. 42),

into,

"संविद्धातुद्रवसतितरां स्वच्छमासाद्य सद्यः
प्रज्ञासंज्ञामपि च फलकां तूलिकां ध्यानरूपाम् ।
शान्तां मूर्तिं तव विलिखितुं भावयाम्येष यावत्
तावद् वैरी नयनयुगळं बाष्पपूरो निरुन्धे ॥" (p. 34),

The author by way of bringing out a forced reference to Kālidāsa in the verse,

"कालीं कालाम्बुदनिभरुचिं तां सकृत् तत्र नत्वा
प्राप्तासि त्वं प्रथितमहसः कालिदासस्य कीर्तिम् ।
सूक्तिज्योत्स्नाद्युतिविततिभिः स्वर्धुनीस्पर्धिनीभिः
श्राव्यं काव्यं भुवि रचयतां मातृका यत्प्रबन्धाः ॥" (p. 18).

seems to be an aspirant of the fame of that master poet, and this is borne out by the following statement of the commentator,

"किञ्चिन्निमित्तमाश्रित्य कालिदासं महाकविम् ।
उपश्लोकयितुं प्राह कविः श्लोकं सुबोधकम् ॥" (p. 18).

Though the author deals with a philosophical theme he always keeps in his mind's eye the dictum that camatkāra is the real life of a poem and in support of this statement may be cited the verse,

"आश्लिष्य त्वामथ विवृणुयां स्नेहमानन्दसान्द्रं
कम्पैः स्वेदैरपि च पुलकैर्नेत्रयोर्मीलनेन ।
यत्संश्लेषे सति तु गुरुणा शङ्करेणाप्यभिन्नं
प्रेक्षिष्यन्ते ननु सुमनसो मां च साक्षान्महेशम् ॥" (p. 36).

He also finds occasion to inculcate some pieces of sound advice, namely, a Pativrata whose husband is far away from

home should live with her parents and that a husband in exile should show his devotion and reverence to his wife's parents, in the verse,

"दूरस्थः सन् प्रणमति मम प्राणनाथोऽनुरक्तः
पादाम्भोजं स खलु युवयोः सख्युरस्यैव मूर्ध्ना ।
इत्थं पित्रोस्तव सदययोः सम्यगावेदयार्यै!
कुर्याः किञ्चित् त्वमपि नमनं तन्वि! ताभ्यां शिवाभ्याम् ॥"

(p. 36).

The outstanding feature of the work is the twofold course namely, the Adhyātmic and the Yogic which are in accordance with the significance of the name "Hamsasandeśa". Among these, the Adhyātmic course is the attainment of Śivasāyujya by a man who is dependent on the Prārabdha Karma and is consequently passing through worldly existence, after he is freed from all worldly bonds and his identity destroyed by faith, understanding, hearing, steadiness, tranquillity, endurance and other kinds of austerity. The Yogic course is the mind's journey through various stages beginning with "Suṣumna" upto "Dvādaśāntendumaṇḍala" and its final repose along with Bhakti in the state of Amṛtayoga. The Yogic course is described thus,

"मूले लिङ्गं महितभुजगीमौलिरत्नायमानं
संसर्पन्त्या शिशिरसुधया द्वादशान्तेन्दुशङ्खात् ।
भक्त्या युक्तस्तव सहजया भूयसैवाभिषिक्तं-
स्तत्तोयेन प्रियसख! तनुं प्लावयित्वा सुखी स्याः ॥" (p. 38).

and the Adhyātmic course is thus pictured,

"न त्यक्ष्यामि क्षणमपि चिरात् संश्रितां तां तु साध्वीं
तस्यां सक्तः सुचिरमनघं स्वाधिराज्यं प्रपत्स्ये ।
श्रद्धां मेधां श्रुतिमपि धृतिं शान्तिदान्ती च मुक्तिं
कृष्णो गोपीजनमिव भजन् निर्वृतस्त्वं च भूयाः ॥" (p. 38).

The softening of a dry philosophical subject with Rasa resulting from the poetic description of the happy union of the best type of hero and heroine is the third course which runs throughout the work and which is relishable by all Sahṛdayas. In support of this statement, a few specimen verses are cited below :—

"दृष्टे तस्मिंश्चिरविरहितां प्रेयसीं रुद्रभक्तिं
स्मारं स्मारं सजलनयनस्तत्र तूष्णीं बभूव ।
उच्चैः स्थित्वा हतविधिवशात् प्राप्तताद्दग्विधानां
मूकीभावः खलु समुचितो बान्धवानां पुरस्तात् ॥" (p. 4).

"भूरिक्लेशे विषयविपिने भूयसा मुह्यमानं
भक्त्यावासं पशुपतिपदं गन्तुमेनं ययाचे ।
नैवाविन्दत् तदिह वचसां चेतसामप्यभूमिं
युक्तायुक्तेष्वपि हि विदुषामर्थिनां नो विवेकः ॥" (p. 5).

"काश्यं यायात् खलु विधिवशात् प्रायशः साम्प्रतं सा
कालुष्यं वा मयि पुनरनाचारमाशङ्कमाना ।
शोचेत् किं वा प्रियसहचरी दुर्लभं मां विदित्वा
किं किं बालाः प्रियविरहिता नैव सञ्चिन्तयन्ति ॥" (p. 32).

"एकान्ते त्वां प्रणयभरितो निर्विशन्नेकदा तु
प्राप्तुं शम्भुं सपदि निभृतो यः पुरा संसृतोऽस्मि ।
अस्मादार्ये! कुशलिनमभिज्ञानतो मां विदित्वा
त्वां चावश्यं भव कुशलिनी तत्पदं सेवमाना ॥" (p. 35).

The route that the Hamsa is asked to take, the various places on the way and their presiding deities are as follows :— The first is the northern quarter and then the holy regions at the confluence of the rivers Ganges and Jumna, where there is a Mūlasthāna guarded by the deities Īśa, Gaṇapati, Subrahmaṇya and Durgā; near this place is the penance grove of Pārvatī and north of this grove is found the Kīcakavana where Siddhas are said to attain supreme felicity; then a huge ant-hill and then Mahāmeru and further on a Maṇṭapa all made of gems, where the goddess Aparṇā takes her seat in the form of a Kirātī (mountaineer); above this Maṇṭapa is Pūrnagirigrāma watched over by the goddess Maṅgalāmbā, then the Jalandhara country directed by Īśvara who remains in a hanging posture and above this is the Śivaloka which is also known as Dvādaśānta.

Nothing has been known about the author of this work or of its metrical commentary. His Highness Viśakham Tirunal Maharaja who was interested in Sanskrit studies and himself a great scholar wrote about this work as follows :—

"The other Hamsasandeśa whose author's name could not be found out, is quite of a different nature. The subject is a philosophical one. It is probable that some rival poet of the Vaishṇava Vedāntācārya has written this, as he (the Vedāntācārya) has composed a Nāṭaka named "Saṅkalpasūryodaya" to match the Prabodhacandrodaya". (J. R. A. S. Vol. XVI. p. 450)

"All these Sandeśas, except the Hamsa ............ are productions of poets born in Malabar". (Ibid. p. 449).

His Highness is of opinion that this work and three other Sandeśas are the productions of Kerala poets and that the author wrote it as Vedānta Deśika wrote his Saṇkalapa-sūryodaya after the model of Prabodhacandrodaya. Vedānta Deśika has written a Hamsasandeśa, but the present work, though it bears an identical name, differs vastly from Deśika's work.

The statement,

"यत्संश्लेषे सति तु गुरुणा शङ्करेणाप्यभिन्नम्' (p. 36).

however gives room for thinking that the author might be a disciple of the great Sankarācarya.

There is also a third Hamsasandeśa, a manuscript copy of which has been acquired for this department. From the introductory and concluding verses of this work,

"काचित् कान्ताविरहशिखिना कामिनी कामतप्ता
निध्यायन्ती कमपि दयितं निर्दयं दूरसंस्थम् ।
भूयो भूयो रणरणकतः पुष्पवाटीं भ्रमन्ती
लीलावापीकमलपथिकं राजहंसं ददर्श ॥"

"अभ्यं विष्णोः पदमनुपतन् पक्षपातेन हंसः
पूर्णज्योतिःपदयुगजुषः पूर्णसारस्वतस्य ।
क्रीडत्येव स्फुटमकलुषे मानसे सज्जनानां
मेघेनोच्चैर्निजरसभरं वर्षतामर्षितोऽपि ॥"

it may be inferred that its author was no other than the Kerala poet Pūrṇasarasvati, a great lover and commentator of Meghaduta, and in the statement मेघेनोच्चैर्निजरसभरम् of the last verse, he appears to make a covert reference to that model lyric of Kalidāsa. I hope to publish this work ere long and also some other Sandeśakāvyas under the title "Sandeśamālikā". As the present work treats of a philosophical subject in poetic form and is accompanied by a metrical commentary, it is placed before the public as the first instalment.

The edition of the work is based on two complete manuscripts. The first marked क belongs to the Palace library, and the second marked ख was obtained from the library of Brahmasri Bhanu Bhanu Pandarathil of Kottarakkara. Both these manuscripts are about four centuries old.

*Trivandrum*
*15-12-105.*

K. SĀMBAŚIVA ŚĀSTRĪ.

## उपोद्घातः ।

अपूर्वमिदं सव्याख्यं किमपि सन्देशकाव्यं, यत्र व्याख्या श्लोकात्मिका। कोऽपि शिवभक्तः सुचिरसहचरीं भक्तिमविरहयन्नद्वैतानन्दमनुभवन् कदाचन कर्मवशात् तद्विरहितः संसरन् परिक्लिश्यमानः पूर्ववासनाबलेन पुनरपि तया सह सङ्गमिच्छन्नात्मनश्चित्तमेव* हंसभूयं प्रापय्य तन्मुखेन शिवलोकवासिन्यास्तस्या निजसन्देशं प्रेषयतीत्ययमत्र प्रतिपाद्यसङ्ग्रहः । चित्तस्य कर्मलेपान्मोहं भक्तिनायिकया विरहे —

"कश्चिन्मायामृगवशगतः कर्मणा मुह्यमानो
भक्त्या शम्भोश्चरणभवया विप्रयुक्तो विषण्णः ।"

(पृ० १. श्लो० १)

इति हेतुमादावुपन्यस्यान्ते तत्सङ्गमे —

"सञ्छिद्याहं मम तदिदमित्यादिसंसारपाशान्
स्वैरं लोके विहर सुचिरं कर्मलेपैरलिप्तः ।"

(पृ० ३९. श्लो० ५१)

इति तदलेपं साधकं निरूपयन् कविरुपक्रमानुगुणमेव सन्देशं समञ्जसमुपसंहरति। न केवलमिदमानुगुण्यं प्रस्तुतमात्रे दत्तदृष्टेः कवेः, अपित्वप्रस्तुतेऽपि । तथाहि —

"रामो यद्वज्जनकसुतया दण्डकारण्यभूमौ
क्षेत्रे प्राप्ते क्वचन पुरुषः कल्पयामास वासम् ॥"

(पृ० १. श्लो० १)

इति श्रीरामस्य सीताविरहसादृश्य उपक्रम्य,

---

* चित्तस्य हंसभावश्च —

"आर्ये! भर्तुस्तव सहचरश्चित्तसंज्ञोऽस्मि हंस-
स्तत्सन्देशादुपगत इहेत्येदमाचक्ष्व तस्यै ।"

(पृ० ३२. श्लो० २९)

इति पद्ये कविनैवाविष्कृतः ।

"कामं हत्वा बहुमुखमथ प्रेयसीं तामवाप्स्ये
यद्वत् पूर्वं रघुकुलपतिर्मैथिलीं मान्यशीलाम् ।"

(पृ० ३८. श्लो० ४९)

इति सीतापुनःप्राप्तिसादृश्य उपसंहारः कृतः ।

सर्वस्यापि सन्देशकाव्यस्य आदिकविश्रीवाल्मीकिरामायणान्तर्गतो हनुमत्सन्देश आदर्शः, महाकविश्रीकालिदासीयमेघसन्देशो निदर्श इति च सहृदयसम्मतं सिद्धान्तमयं हंससन्देशकर्ता—

"क्षेत्रे तस्मिन् सह विहरतामिन्द्रियाणां मृगाणां
कृत्वा तृप्तिं विषयकबलैर्यापयित्वा दिनानि ।
संसाराब्धेः प्रतरणविधावाञ्जनेयं यथान्यं
हंसं कञ्चित् सहचरमसौ मानसस्थं ददर्श ॥"

(पृ० २. श्लो० २)

इति वाच्यवृत्त्या,

"त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥"

(मेघस० उत्तर० श्लो० ४२)

इति मेघसन्देशगतपद्यच्छायाविवर्तात्मना—

"संविद्धातुद्रवमतितरां स्वच्छमासाद्य सद्यः
प्रज्ञासंज्ञामपि च फलकां तूलिकां ध्यानरूपाम् ।
शान्तां मूर्तिं तत्र विलिखितुं भावयाम्येष यावत्
तावद् वैरी नयनयुगलं बाष्पपूरो निरुन्धे ॥"

(पृ० ३४. श्लो० ३५)

इति पद्येन व्यङ्ग्यभङ्ग्या च रेखामात्रमप्यव्यतियन्ननुतिष्ठतीति सुविशदं सुधियाम् । किञ्च

"कालीं कालाम्बुदनिभरुचिं तां सकृत् तत्र नत्वा
प्राशासि त्वं प्रथितमहसः कालिदासस्य कीर्तिम् ।

सूक्तिज्योत्स्नास्रुतिविततिभिः स्वर्धुनीस्पर्धिनीभिः
श्राव्यं काव्यं भुवि रचयतां मातृका यत्प्रबन्धाः ॥"

(पृ० १८. श्लो० ३८)

इति श्लोकेन कथञ्चिदपि हठान्निमित्तमुपाक्षिप्य श्रीकालिदासमुपश्लोकयन् कविरयं स्वयं हंसापदेशेन कालिदासकीर्तिकामी स्वर्धुनीस्पर्धिनीभ्यस्तदीयसूक्तिज्योत्स्नास्रुतिविततिभ्यः स्पर्धत इव। अत्राह व्याख्याता —

"किञ्चिन्निमित्तमाश्रित्य कालिदासं महाकविम्।
उपश्लोकयितुं प्राह कविः श्लोकं सुबोधकम् ॥"

इति।

चिरतरानुभूतनायिकाविरहकातरस्य कामुकस्यानाचारबलाद् दूरनीतस्य चित्तहंसं प्रसाद्य दूतेन तेन नायिकायाः स्वसविधप्रापणे,

"आश्लिष्य त्वामथ विवृणुयां स्नेहमानन्दसान्द्रं
कम्पैः स्वेदैरपि च पुलकैर्नेत्रयोर्मीलनेन।
यत्संश्लेषे सति तु गुरुणा शङ्करेणाप्यभिन्नं
प्रेक्षिष्यन्ते ननु सुमनसो मां च साक्षान्महेशम् ॥"

(पृ० ३६. श्लो० ३९)

इति सङ्कल्पकल्पितं सान्द्रानन्दानुभवमनुगतैः कम्पस्वेदपुलकनेत्रमीलनादिभिर्व्यभिचारिभिर्व्यङ्ग्यमर्यादया विवरीतुमुद्युञ्जानः कविरयं मन्ये सन्देशकाव्यस्यास्य चमत्कारजीवितत्वं वाञ्छति। अन्यच्च' वेदान्तप्रक्रियानिरूपणमभिसन्दधताप्यनेन सन्देशेन —

"दूरस्थः सन् प्रणमति मम प्राणनाथोऽनुरक्तः
पादाम्भोजं स खलु युवयोः सख्युरस्यैव मूर्ध्ना।
इत्थं पित्रोस्तव सदययोः सम्यगावेदयार्ये!
कुर्याः किञ्चित् त्वमपि नमनं तन्वि! ताभ्यां शिवाभ्याम् ॥"

(पृ० ३६. श्लो० ४०)

इत्युक्तदिशा भर्तृविरहितायाः पतिव्रतायाः पितृगृहे निवासस्तादृशे श्वशुरजने भर्तुर्विनयबहुमानने च प्रकृताविरुद्धान्येव यत्तत् साम्प्रतमेवोपदिश्यन्ते।

सन्देशेऽस्मिन्निदमेकमवश्यं श्रद्धेयं, यत् परमार्थभूतया अध्यात्मसरण्या, तदुपायभूतया योगपद्धत्या च हंससन्देश इति नामधेयानुगुणा द्वयी गतिरादृता। तत्र प्रथमा—प्रारब्धकर्मणा परवतः संसारिजनस्य स्वचित्ते श्रद्धामेधाश्रुतिधृति-शान्तिदान्त्यादिभिः सर्वबन्धविनिर्मुक्ते विलीने स्वरूपनाश एव सति परमात्मरति-रूपया भक्त्या कदाप्यविरहितया शिवसायुज्यरूपस्वाधिराज्यप्राप्तिः। द्वितीया—युञ्जानस्य चित्तहंसस्योपक्रम्य सौषुम्नमध्वानं द्वादशान्तेन्दुमण्डलं यावदनु-क्रमशस्तास्ताः कक्ष्या अतिलङ्घ्य शक्त्या सह गमनेऽन्ततोऽमृतयोगेनाव-स्थानम्। अनयोश्च द्वयोरपि गत्योः पार्यन्तिकाभिसन्धिसमुट्टङ्कनमेवं दृश्यते। यथा योगपद्धतेः—

"मूले लिङ्गं महितभुजगीमौलिरत्नायमानं
संसर्पन्त्या शिशिरसुधया द्वादशान्तेन्दुशङ्खात्।
भक्त्या युक्तस्तव सहजया भूयसैवाभिषिञ्चं-
स्तत्तोयेन प्रियसख! तनुं प्लावयित्वा सुखी स्याः॥"

(पृ० ३८. श्लो० ४७)

अध्यात्मसरणेः—

"न त्यक्ष्यामि क्षणमपि चिरात् संश्रितां तां तु साध्वीं
तस्यां सक्तः सुचिरमनघं स्वाधिराज्यं प्रपत्स्ये।
श्रद्धां मेधां श्रुतिमपि धृतिं शान्तिदान्ती च मुक्तिं
कृष्णो गोपीजनमिव भजन् निर्वृतस्त्वं च भूयाः॥"

(पृ० ३८. श्लो० ५०)

इति। अथ सर्वाङ्गीणा च साहित्यगोष्ठीसरसा तृतीयापि गतिरुत्तमनायिकया नायकस्य सङ्गमसमाचारपर्यवसायिनी शुष्ककर्कशशास्त्रीयसिद्धान्तमेव काव्य-रसेनानुलिम्पती समास्वाद्या दृश्यते। अत्र चेमानि पद्यानि स्थालीपुलाकन्या-येनोदाहरणमुद्भ्रियन्ते—

"दृष्ट्वा तस्मिंश्चिरविरहितां प्रेयसीं रुद्रभक्तिं
स्मारं स्मारं सजलनयनस्तत्र तूष्णीं बभूव।
उच्चैः स्थित्वा हतविधिवशात् प्राप्ततादृग्विधानां
मूकीभावः खलु समुचितो बान्धवानां पुरस्तात्॥"

(पृ० ४. श्लो० ३)

"भूरिक्लेशे विषयविपिने भूयसा मुह्यमानं
भक्त्यावासं पशुपतिपदं गन्तुमेनं ययाचे ।
नैवाविन्दत् तदिह वचसां चेतसामप्यभूमिं
युक्तायुक्तेष्वपि हि विदुषामार्थिनां नो विवेकः ॥"
(पृ० ५. श्लो० ५)

"काश्यं यायात् खलु विधिवशात् प्रायशः साम्प्रतं सा
कालुष्यं वा मयि पुनरनाचारमाशङ्कमाना ।
शोचेत् किं वा प्रियसहचरी दुर्लभं मां विदित्वा
किं किं बालाः प्रियविरहिता नैव सञ्चिन्तयन्ति ॥"
(पृ० ३२. श्लो० २६)

"एकान्ते त्वां प्रणयभरितो निर्विशन्नेकदा तु
प्राप्तुं शम्भुं सपदि निभृतो यः पुरा संस्मृतोऽस्मि ।
अस्मादार्ये! कुशलिनमभिज्ञानतो मां विदित्वा
त्वं चावश्यं भव कुशलिनी तत्पदं सेवमाना ॥"
(पृ० ३५. श्लो० ३७)

भूमेः शिवलोकपर्यन्तं गमने हंसायोपदिश्यमाना मार्गास्तदन्तर्गता देशास्तत्तदधिष्ठानदेवताश्चाधः प्रदर्श्यन्ते । यथा —

आदितः सौम्या दिक् । ततो गङ्गायमुनासङ्गमाख्यपुण्यतीर्थप्रदेशः । तत्र नवशशिभृतः कामरूपं मूलस्थानं किमपि । तत्र च ईशः, गणपतिः, सुब्रह्मण्यः, दुर्गा इति चतस्रो देवताः । (पृ० ११. श्लो० १८–२०)

ततस्समीपे पार्वतीतपोवनम् । (पृ० १२. श्लो० २३)

तत उत्तरस्यां कीचकचक्रं सिद्धजनसिद्धिनिवासस्थानम् । (पृ० १३. श्लो० २६)

ततः कोऽपि महान् वल्मीकप्रदेशः । (पृ० १६. श्लो० ३२)

ततो महामेरुः (पृ० १६. श्लो० ३३,३४)

ततो मणिमयः कोऽपि मण्डपः । तत्र अपर्णादेवी किरातीरूपिणी काळी । (पृ० १७. श्लो० ३७)

तदुपरि सिद्धवन्द्यः कश्चन पूर्णगिर्यालयः । तत्र देवी मङ्गलाम्बा । (पृ० १८. श्लो० ४०)

ततः परं जालन्धरदेशः । तत्र लम्बिकानिषण्ण ईश्वरः । (पृ० २२. श्लो० ४७)

ततः श्रीकैलासाख्यं स्थानम् । (पृ० २३. श्लो० ४८)

तत्रैवोपरिद्वादशान्तापरनामधेयः शिवलोकः (पृ० २४. श्लो० ५०)

सर्वथा सहृदयहृदयग्राहिण्या सरण्या दुरधिगममपि समस्तोपनिषत्सार-भूतमर्थमेनं सन्देशमपदिश्यानपायिशिवभक्तिनिरूपणद्वारा लोकानुपदिशन्नयं कविर्यथार्थतः कोऽपि हंस एव प्रतिभाति ॥

अस्य च सन्देशकर्तुर्नामधेयदेशजीवितसमयादिकं प्रति न किमप्य-वगम्यते । पण्डितसार्वभौमाः पुरातनकार्यविमर्शश्रद्धालवश्चास्माकं श्रीविशाख-महाराजाः १८८४ तमक्रिस्तुवर्षप्रकाशितएष्याट्टिक् सोसैट्टि जर्नल् संज्ञि-तायां सञ्चिकायां ४५० तमे पृष्ठे The other 'Hamsa sandesa' whose author's name could not be found out, is quite of a different nature. The subject is a philosophical one. It is probable that some rival poet of the Vaishnava Vedandacharya has written this, as he(the Vedantacharya) has composed a nataka named 'Sankalpasūryodaya' to match the 'Prabodhachandrodaya'

इति कथयन्ति । अन्यत्र च ४४९ तमे पुटे

'All these, सन्देशाः exept हंस are productions of poets born in Malabar.'

इति प्रस्तुतं हंससन्देशमप्यन्तर्भाव्य चतुर्णां सन्देशानां केरळाभिजन-कविनिर्मितत्वं वदन्ति । इयता अस्य कर्ता कोऽपि केरळीयः, स च प्रबोध-चन्द्रोदयदर्शनादिव श्रीवेदान्तदेशिकाचार्यः सङ्कल्पसूर्योदयं, सूर्योदयदर्शना-दिमं हंसं समुत्थापयति स्म । नामसाम्येऽपि श्रीवेदान्तदेशिकीयहंससन्देश-स्यास्य च सर्वथा महदन्तरं, कर्तृनामधेयं च ज्ञातुं न शक्यत इति प्रतिपाद्यते । किन्तु पूर्वोद्धृतद्वात्रिंशपुटगतैकोनचत्वारिंशश्लोके 'यत्संश्लेषे सति तु गुरुणा शङ्करेणाप्यभिन्नः' इति कथनाद् अपिनाम भवेदयं जगद्गुरुश्रीशङ्कराचार्य-भगवत्पादानां कश्चिदन्तेवासीति सम्भावना प्रसरति । यथा कर्तुस्तथा व्याख्या-तुरपि नामधेयादिकं न ज्ञायते ।

अथ तृतीयोऽपि कश्चन हंससन्देशः सम्प्रति दृष्टोऽनुभूतश्च मन्येऽव-श्यमिह प्रस्तावनामर्हति । यत्रेमावाद्यन्तौ श्लोकौ भवतः —

"काचित् कान्ता विरहशिखिना कामिनी कामतप्ता
निध्यायन्ती कमपि दयितं निर्दयं दूरसंस्थम् ।
भूयोभूयो रणरणकतः पुष्पवाटीं भ्रमन्ती
लीलावापीकमलपथिकं राजहंसं ददर्श ॥

"अग्र्यं विष्णोः पदमनुपतन् पक्षपातेन हंसः
पूर्णज्योतिःपदयुगजुषः पूर्णसारस्वतस्य ।
क्रीडत्येव स्फुटमकलुषे मानसे सज्जनानां
मेघेनोच्चैर्निजरसभरं वर्षतामर्षितोऽपि ॥"

इति । अत्रास्मादन्तिमश्लोकात् सन्देशोऽयं सुप्रसिद्धस्य केरलीयमहाकवेः श्री-**पूर्णसरस्वती**नामधेयस्येति शक्यमभ्यूहितुम् । तत्रत्येन 'मेघेनोच्चैरि'त्यनेन मेघसन्देशकाव्ये प्रीतिमांस्तद्व्याख्याता स्वयं पूर्णसरस्वतीकविर्निर्मत्सरे रसिक-जनमानसे स्वकीयस्य हंससन्देशस्य क्रीडनमविरुद्धं व्यङ्ग्यभङ्ग्या समर्थयत इव । निसर्गतो विरहवेदनासहनशीलाभ्यः कामिनीभ्यस्तदसहनाः कमनाः सन्देशमारचयन्तीति सम्प्रदायं परिहायेह पूर्णसरस्वतीये —

'काचित् कान्ता विरहशिखिना कामिनी कामतप्ता'

इति कामिन्या कमनाय सन्देशः कृत इत्ययं विशेषो दृश्यते । न चिरादिमं प्रकाश्य कृतार्थीभवितुं सहृदयानुग्रहजीवातुः प्रयतिताहे । सन्देशमालिकानाम्न कतीनाञ्चन सन्देशकाव्यानां प्रसिद्धीकरणे कृतमतिरपि प्रकृतस्याध्यात्म-विषयतया पद्यात्मकव्याख्यासनाथतया च सर्वथा अद्वितीयस्यैव प्रकाशनं रसिकजनरुचितमादितः श्रेयस इति तथा कृतवानस्मि ।

अस्य हंससन्देशस्य प्रसाधनप्रकाशनयोरवलम्बभूते मातृके द्वे समग्रे । तयोः प्रथमा — क.संज्ञा महाराजग्रन्थशालीया । द्वितीया—कोट्टारक्कर ब्रह्मश्री **भानुपण्डारत्तिल्**स्वामिका । द्वे अपि मार्कीं चतुश्शतपरिवत्सरीपरिवृद्धे दृ-श्येते ॥

अनन्तशयनम्,
१५-१२-१०५.

के. साम्बशिवशास्त्री.

UNIVERSITY LIBRARY
-4 SEP. 1931

॥ श्रीः ॥

# हंससन्देशः

सव्याख्यः ।

---

कश्चिन्मायामृगवशगतः कर्मणा मुह्यमानो
भक्त्या शम्भोश्चरणभवया विप्रयुक्तो विषण्णः ।
रामो यद्वज्जनकसुतया दण्डकारण्यभूमौ
क्षेत्रे प्राप्ते क्वचन पुरुषः कल्पयामास वासम् ॥ १ ॥

गणेश्वरं नमस्कृत्य गुरूंश्च करुणानिधीन् ।
गम्भीरे हंससन्देशे गूढार्थं दर्शयाम्यहम् ॥
अविघ्नेन समाप्त्यर्थं शिष्टाचारानुसारतः ।
करोति मङ्गलाचारं तत्त्वानुस्मृतिलक्षणम् ॥

कश्चिन्मायेति ।

को ब्रह्मा[1] परमात्मा वा किंवा ब्रह्म श्रुतौ श्रुतम् ।
चिज्जीवात्मा तयोरैक्यं कश्चिदित्यत्र कीर्त्यते[2] ॥
मृगवच्चेतनाहीना[3] मृगैर्मायात्र रूप्यते ।
मायामृगात्मा मारीचो यद्वद् राममवञ्चयत् ॥
षड्भिर्भावविकारैः स्वैर्निर्विकारं निरञ्जनम् ।
अयस्कान्तमयांसीव माया भ्रामयतीश्वरम् ॥
रामो रक्षःप्रयुक्तेन यथा भ्रमणकर्मणा ।
मायाकर्मभिरात्मापि[4] चक्रवत् परिवर्तते ॥
भक्तिर्ज्ञानं च वैराग्यमैश्वर्यं मोक्षसाधनम् ।
शिवभक्तिविहीनानां संसारप्राप्तिरात्मनाम् ॥

---

१. 'ह्मा जीवात्मा प' , २. 'भिधीयते' , ३. 'नं' क. पाठः. ४. 'च' ख. पाठः.

G. P. T. 682. 500. 20-1-1105. B

यः प्रयच्छति भक्तेभ्यः शं सुखं मोक्षलक्षणम् ।
शम्भुरित्युच्यते सद्भिः सोऽन्तर्यामी सदाशिवः ॥
वेदेष्वधी(त ? तं) चरणं पवित्रमिति यत् प्रभोः ।
भक्तिस्तस्मिन् समुद्भूता द्रोणी संसारतारणी ॥
रामः सीतावियुक्तत्वादभूद् भोगेषु निःस्पृहः ।
स्वर्गादिभोगेष्वात्मापि विषण्णोऽभूद् विनाशिषु ॥
नवद्वारं पुरं देहं क्षेत्रमित्युच्यते बुधैः ।
पुरि क्षेत्रे शेत इति क्षेत्रज्ञः पुरुषः स्मृतः ॥
देहस्य दण्डकारण्यतुल्यत्वं दुःखहेतुता ।
प्राग्जन्मोपार्जितैः पुण्यैः प्राप्ते ब्राह्मणविग्रहे ॥
सन्न्यासाख्याश्रमयुते क्वचन ज्ञानसाधने ।
आत्मा काल्पनिकं वासमकरोन्नतु वास्तवम् ॥
मनुष्योऽहं कृशः कृष्णो वर्णाश्रमसमन्वितः ।
ज्ञानी कर्मी सुखी दुःखीत्येवमाद्यास्य कल्पना ॥
नित्यमेकान्तशीलानां यतीनां योगिनामपि ।
पुण्यक्षेत्रनिवासश्च ध्वन्यतेऽत्र तपस्विनाम् ॥
तत्त्वमित्थं विनिर्धार्य तत्साक्षात्कारकारिणीम् ।
अजपामन्त्ररुद्यन्तीं[1] वदन्त्यक्षरमातृकाम् ॥ १ ॥

**क्षेत्रे तस्मिन् सहविहरतामिन्द्रियाणां मृगाणां**
**कृत्वा तृप्तिं विषयकवलैर्यापयित्वा दिनानि ।**
**संसाराब्धेः प्रतरणविधावाञ्जनेयं यथान्यं**
**हंसं कश्चित् सहचरमसौ[2] मानसस्थं ददर्श ॥ २ ॥**

**क्षेत्रे तस्मिन्निति** । मानसस्थमिति पाठः ।
पराग्रूपेषु विषयेष्विन्द्रियाणां प्रधावताम् ।
व्यस्तेन रूपकेणात्र रूप्यते मृगरूपता ॥

---

१. 'द्य' ख. पाठः. २. 'म त संज्ञं द' क. पाठः.

प्रत्यभूपापरिज्ञानादिन्द्रियाणां मृगात्मता ।
दिग्वातार्कप्रचेतोश्विवह्वीन्द्रोपेन्द्रमित्रकाः ॥

सहैव सन्तं श्रोत्रादौ[1] न विजानन्ति देवताः ।
योगाभ्यासैकनिष्ठानां पुण्यक्षेत्रनिवासिनाम् ॥

पुण्या मृगाः सहचरा इत्येषोऽर्थोऽत्र सूच्यते ।
यत्र कृष्णमृगाः सन्ति तत्र धर्मान् निबोधत ॥

दर्भग्रासादिदानेन मृगादीनां दयालवः ।
कालक्षेपं प्रकुर्वन्ति समाध्यन्ते तपस्विनः ॥

हनूमान् स्वयमुत्तीर्णः (सेतुं ? सिन्धुं) रामं च तारयन् ।
सेतुं चकार विस्तीर्णं शैलैः कपिकुलाहृतैः ॥

हंसोव्यै[2]ञ्जनरूपाख्यां( ? ) कुण्डलिन्यां समुत्थितः ।
कुरुते तारकं सेतुं योगं[3]तत्त्वप्रकाशकम् ॥

यश्चित्तसन्ततिगतः स लयः प्रदिष्टो
यश्च प्रभञ्जननिरोधकृतो हठः सः ।
यो मन्त्रमूर्तिवशगः स तु मन्त्रयोगो
यश्चित्तवृत्तिरहितः स तु राजयोगः ॥

कश्चिल्लौकिकहंसेभ्य उत्कृष्टं मन्त्ररूपिणम् ।
अन्तः सहाभ्यां वर्णाभ्यां सञ्चरन्तं निरन्तरम् ॥
अग्नीषोमात्मकं प्राहुः शिवशक्त्यात्मकं च त(त् ? म्) ।
प्राणापानात्मकं केचित् सततं प्रेर्यते य(तौ ? तः) ॥
शक्त्यहङ्कारधीनादजीवचित्तमरुद्गणैः ।
हंस इत्युच्यते सद्भिः परहंसः परः शिवः ॥
स एव प्रतिलोमेन संहारक्रमतो बुधैः ।
सोऽहमित्युपदिष्टोऽत्र स्थूलो हंसः प्रकीर्त्यते ॥
सकारं च हकारं च लोपयित्वा प्रयोजयेत् ।
सन्धिं च पूर्वरूपा(ख्यां ? ख्यं) ततोऽसौ प्रणवो भवेत् ॥

१. 'दे:' ख. पाठः. २. 'व्य', ३. 'गं' क. पाठः. ४. 'णम् । अग्नी' ख. पाठः ५. 'अग्निष्टोमा', ६ 'च', ७. 'णाः' क. पाठः.

अकारं चाप्युकारं च मकारं बिन्दुनादकम् ।
पञ्च वर्णानमुष्याहुः पञ्चब्रह्मप्रकाशकान् ॥
प्रणवस्य शिखेत्युक्तः परो हंसो मनीषिभिः ।
यो वेदादौ स्वर इति श्रुतिषु प्रतिपादितः ॥
बिन्दुनादात्मकः सोऽयं दृश्यते मानसे स्थितः ।
प्रसन्ने लौकिको हंसो यथा सरसि मानसे ॥
इति प्रोक्तो मन्त्रयोगो भक्तियोगस्तु भाष्यते ॥ २ ॥

**दृष्टे तस्मिंश्चिरविरहितां प्रेयसीं रुद्रभक्तिं**
**स्मारं स्मारं सजलनयनस्तत्र तूष्णीं बभूव ।**
**उच्चैः स्थित्वा हतविधिवशात् प्राप्ततादृग्विधानां**
**मूकीभावः खलु समुचितो बान्धवानां पुरस्तात् ॥ ३ ॥**

**दृष्टे तस्मिन्निति ।**

भक्तस्यानन्दयोगेन स्त्रीवियुक्तस्य योगिनः ।
तूष्णींभावोऽश्रुपातश्च स्यातां भावविभागतः ॥
साम्राज्ये सुचिरं स्थित्वा राजा युद्धे पराजितः ।
तूष्णीं स्याच्छत्रुतो बद्धो व्रीलितो बन्धुदर्शने ॥
भ्रष्टः कर्मवशात् स्वर्गाद् देहमाश्रित्य दुःखितः ।
मोक्षस्य ते + दृष्टेऽस्मिन् समाधौ मौनमाश्रयेत् ॥ ३ ॥

**जन्मग्रीष्मश्रममुषि मिलत्सच्चिदानन्दवर्षे**
**सोहम्भावस्फुरणसमये सम्यगासाद्यमाने ।**
**आत्मोदन्तं प्रियजनमसौ प्रापयिष्यन् प्रहृष्टः**
**क्लृप्तार्घाय प्रशमकुसुमैः स्वस्ति तस्मै जगाद ॥ ४ ॥**

**जन्मग्रीष्मेति ।**

प्रेयस्याः स्वां दशां वक्तुं प्रियाविरहितः पुमान् ।
दूतं सन्तोष्य गमयन्नाशास्ते मङ्गलाशिषः ॥

---

१. 'शोकतः ।' क. पाठः.

शिवोऽहमित्यनुभवं शुश्रूषूनपि बोधयन् ।
कृत्वात्ममनसः शान्तिं मङ्गलं मोक्षमादिशत् ॥ ४ ॥

भूरिक्लेशे विषयविपिने भूयसा मुह्यमानं
भक्त्यावासं[2] पशुपतिपदं गन्तुमेनं ययाचे ।
नैवाविन्दत् तदिह वचसां चेतसामप्यभूमिं
युक्तायुक्तेष्वपि हि विदुषामर्थिनां नो विवेकः ॥ ५ ॥

भूरिक्लेश इति ।

आर्जने रक्षणे नाशेऽप्यर्थो[3] दुःखतरा भृशम् ।
अर्थसाध्याश्च विषया इति मुग्धा न (मंस? मन्व)ते ॥
विपिनैः सह रूप्यन्ते विषयाः क्लेशसाम्यतः ।
गन्तुं निर्विषयं स्थानं याचते विषयोद्यतम् ॥
दूतो मन्दं[4]गतिः स्थानं[5] गन्तव्यमतिदूरतः ।
असाध्यमिति कामार्त्ता न विजानन्त्यपेक्षया ॥ ५ ॥

देवेष्वेकस्त्रिषु वितनुते सात्त्विकं प्राप्य रक्षां
लोकस्यान्यौ जननिधने राजसं तामसं च ।
तस्माद् यामि त्रिभुवनगुरुं[6] दीनदीनोऽर्थिभावात्
कः संश्रित्य प्रभुमनुगुणं प्राप्नुयान्न स्वकामान् ॥ ६ ॥

देवेष्वेक इति ।

हे मनस्त्वां समाश्रित्य गुणत्रयसमन्वितम् ।
सृष्टिरक्षणसंहारान् कुर्वन्त्यजहरीश्वराः ॥
तस्माद् गुणानुसारित्वादानुकूल्याच्च सात्त्विकम् ।
त्वामाश्रयामि संततं[8] गुरुं संसारतारकम् ॥ ६ ॥

औदासीन्यं नहि समुचितं साम्प्रतं मय्यनाथे
यज्जन्तूनां भवति दयितं जीवितं त्वद्विधेयम् ।

---

१. 'शे', २. 'मि' क. पाठः. ३. 'विषयाः क्लेशभागिनः ।' ख. पाठः. ४. 'न्त्र' क. पाठः. ५. 'न्धा' ख. पाठः. ६. 'रून्' क. पाठः. ७. 'तः', ८. 'शरणं गु' ख. पाठः.

भूयादण्डं भुवनमखिलं त्वां विना पाहि तन्मां
भक्तिं यथास्तव च सहजामाशु सन्देशतो मे ॥ ७ ॥

औदासीन्यमिति ।

त्यजामि जीवितं [1]प्रेष्ठमौदासीन्यं करोषि चेत् ।
प्रवर्तसे चेदन्यत्र न मे काश्चित् प्रवृत्तयः ॥

अयमभिप्रायः —

चित्तायत्तं धातुबद्धं शरीरं चित्ते नष्टे धातवो यान्ति नाशम् ।
तस्माच्चित्तं सर्वतो रक्षणीयं स्वस्थे चित्ते प्राप्यते वाञ्छितार्थः ॥७॥

गन्तव्यं ते गिरिशसदनं द्वादशान्ताभिधानं
धन्या तस्मिन् भुवनमहिता सत्वरं मुक्तिकन्या ।
शान्तिश्रद्धाश्रुतिपरिवृता त्वां त्वियं चेद् वृणीते
प्राप्ताश्लेषः प्रियसख! तथा नैव [2]मां विस्मरे[3] त्वम् ॥ ८ ॥

गन्तव्यमिति ।

जीवन्मुक्तः प्रियतमामवाप्य रमसे यदि ।
अणिमादिष्वतिभ्रान्तो नात्मध्यानं परित्यज ॥
प्रेयसीं मम सन्देशे प्री[4]र्णये[5]त्यपि बुध्यते ॥ ८ ॥

आदौ तावच्छृणु कथयतो मार्गमव्याहतं मे
सन्देशं ते श्रवणसुभगं सौम्य! वक्ष्यामि पश्चात् ।
पीत्वा पीत्वा शशिविगलितां [6]यत्र पीयूषधारां
पद्मे पद्मे विहितवसतिः प्रत्यहं यास्यसि त्वम् ॥ ९ ॥

आदौ तावदिति ।

मोक्षमार्ग[7]ः सुषुम्णाख्या ब्रह्मनाडीति विश्रुत[8]ः ।
प्रापयेत् पिङ्गला [9]स्वर्गं[10] पितृलोकमिडा तथा ॥
मार्गस्याव्याहतत्वं तु मरणव्याधिहीनता ।
सन्देशो नाम दूतेन हार्यमाणार्थवाचकः ॥
परमार्थोपदेशो वा श्रवणात् पापनाशनः ।
वि[11]श्रम्याधारपद्मेषु धारणाभ्यासयोगतः ॥

---

१. 'श्रे' क. पाठः. २. 'मा', ३. 'रार्थम् ।', ४. 'णा' ख. पाठः. ५. 'य', ६. 'स', ७. 'र्गो' क. पाठः. ८. 'ख्यो' ख. पाठः. ९. 'ता' क. पाठः. १०. 'मा' ख. पाठः. ११. 'श्रा' क. पाठः.

स्यन्दमानां सुधां पीत्वा द्वादशान्तेन्दुमण्डलात् ।
परमानन्दसन्तुष्टः प्रत्यहं त्वं गमिष्यसि ॥ ९ ॥

मार्गा[1] बुद्ध[2]क्षपणककणादाक्षपादैः प्रयाता
युक्ता गन्तुं नखलु भवता कर्कशास्तर्कशैलैः ।
अन्यान् कांश्चिच्छिवपदचरानादराद् वच्मि साधो!
तेषामेकं प्रविश सहसा यत् सखे! रोचते ते ॥ १० ॥

मार्गा इति ।

बौद्धाः शून्यत्वमिच्छन्ति बुद्धिं च क्षणनाशिनीम् ।
निर्विश्रमां च श्रमणाः सततोर्ध्वगतिं विदुः ॥
अन्तः प्रविष्टं[3] जन्तूनां सर्वात्मानं सदाशिवम् ।
कणादश्चाक्षपादश्च मन्वाते भिन्नमात्मना ॥
सुखपादप्रचाराश्च शिवलोकप्रवेशकाः ।
बहवः सन्ति मार्गाश्च सौषुम्णोऽध्वा तवोचितः ॥ १० ॥

आदौ तत्त्वं तदनु भुवनं तत्परस्तात् पदं स्यात्
पश्चाद् वर्णो मनुरथ ततश्चो[4]र्ध्वमध्वा कलैव ।
कालक्षेपो न भवतु तवेत्यत्र संसूचितास्ते
ये[5]षामेषां विभवकथने कल्पकोटिश्च नालम् ॥ ११ ॥

आदौ तत्त्वमिति ।

भूतानि पञ्च प्राणाश्च करणानि चतुर्दश ।
अध्वानोऽन्ये प्रसिद्धत्वात् प्रपञ्च्यन्ते न विस्तरात् ॥ ११ ॥

सौषुम्णोऽध्वा सकलसुगमो नैव शीतो नचोष्णो
हिंस्रैः स्पृष्टो नहि पुनरयं मृत्युमूर्छाज्वराद्यैः ।
तत्त्वालम्बी भुवनमहितो योऽन्यवर्णे पदे स्वे
स्थित्वा नूनं मनुरपि कलासंश्रयो येन यातः ॥ १२ ॥

सौषुम्णोऽध्वेति ।

सकलस्य परिज्ञानात् स हि तस्य तवोचितः ।
मार्गोऽ[6]ग्नीषोमयोरैक्याच्छीतोष्णादिविवर्जितः ॥

---

१. 'ति' क. पाठः. २ 'बौ', ३. 'ह', ४. 'हा' ख. पाठः. ५. 'ते', ६. 'मिष्ठोम' क. पाठः.

मनुर्नादात्मको मन्त्रः षण्णामप्याश्रयोऽध्वनाम् ।
मूलात् परा च पश्यन्ती मध्यमा वैखरीति च ॥
परिणामुपागम्य तं चादिस्थानघट्टनात् ।
पञ्चाशद्वर्णतां प्राप्य सर्वमन्त्रात्मतां गतः ॥
याति सौषुम्णमार्गेण त्वं च तं मार्गमाश्रय ।
नीत्यादिशास्त्रतत्त्वज्ञस्त्रिषु लोकेषु विश्रुतः ॥
साम्राज्ये स्वे पदे स्थित्वा वर्णाश्रमसमन्विते ।
चतुष्षष्टिकलायुक्तो येन लोकानपालयत् ॥
स आचारः सतां सेव्य इति श्लेषेण कीर्त्तितम् ॥ १२ ॥

सेतुः सोऽयं भवजलनिधेर्गन्तुकामस्य पारं
निःश्रेणी च त्रिदशभुवनारोहणायानपाया ।
पक्कं लब्धुं सुचरितफलं कल्पवृक्षोऽन्तिकस्थः
स्थानं शम्भोस्तव जिगमिषोर्यस्तु मार्गो मयोक्तः ॥ १३ ॥
सेतुः सोऽयमिति ।

तारस्य नादरूपस्य सा सुषुम्णा निवासभूः ।
सेतुरित्युच्यते सेयं संसाराम्भोधितारणात् ॥ १३ ॥

शास्त्रं बौद्धं तुलयतितरां पञ्चभिः स्कन्धभेदै-
र्यत्रोत्पन्नैर्जगदिदमभिव्यज्यते मार्गभेदैः ।
वेदान्तं च प्रथयति पुनः सौम्य! सौषुम्णमार्ग-
स्तत्त्वेनान्तः किल विलसता दूषयन्नन्यभावम् ॥ १४ ॥
शास्त्रमिति ।

मध्यस्थायाः सुषुम्णायाः पञ्चपर्वसमुद्भवाः ।
शाखोपशाखारूपेण वर्ण्यन्ते कोटिनाडयः ॥
सौत्रान्तिक(:) श्रावकाख्यं मन्त्रं वैभाषिकोऽब्रवीत् ।
योगाचारश्च वज्राख्यमिति यानत्रयं क्रमात् ॥
महायानं माध्यमिक(मि? इ)ति बौद्धाश्चतुर्विधाः ।
द्वादशायतनान्याद्यः पञ्च स्कन्धाननन्तरः ॥

---

१. 'माणमु', २. 'ग:', ३. 'व्छू', ४. 'णा' क. पाठः. ५. 'नौख्य: प' ख.पाठः.

अन्यस्तु क्षणिकज्ञानमभावं शून्यमन्तिमः।
षडिन्द्रियैः षड्विषयैर्द्वादशायतनं विदुः॥

स्कन्धास्तु रूपविज्ञानसंज्ञासंस्कारवेदनाः।
मनुष्यादिशरीराणां परिणामविधायकाः॥

रूप्यन्त इति रूपाणि विषयाश्चेन्द्रियाणि च।
विषयेन्द्रिययोर्ज्ञानं विज्ञानस्कन्ध उच्यते॥

सुखं दुःखं च मोहश्च स्कन्धः स्याद् वेदनाह्वयः।
संज्ञागुणक्रियाजातिविशिष्टप्रत्ययात्मिका॥

पञ्चधा कल्पना प्रोक्ता संज्ञास्कन्धस्तु सौगतैः।
गवां गौरिति संज्ञोक्ता जातिर्गोत्वं तु गोगतम्॥

गुणाः शुक्लादयस्तस्य गच्छन्त्याद्यास्तथा क्रियाः।
शृङ्गी चतुष्पाल्लोङ्गूली विशिष्टप्रत्ययस्त्वसौ॥

एवं पञ्चविधा क्लृप्तिः संज्ञास्कन्ध इतीर्यते।
रागाद्याः पुण्यपापे च संस्कारस्कन्ध उच्यते॥

स्वतःकालदशादेशविप्रकृष्टार्थवेदिना।
क्षणिकत्वं च शून्यत्वं दृष्यते स्थायिनात्मना॥

प्रधानपरमाण्वाद्या विप्रकृष्टाः स्वभावतः।
कालतो विप्रकृष्टास्तु कूर्मवामनकल्कयः॥

देशतो विप्रकृष्टास्तु हिमवन्मेरुमन्दराः।
जाग्रत्स्वप्नोद्भवा भावा अवस्थाविप्रकर्षिणः॥ १४॥

**आपृच्छस्व प्रकृतिमनघामादरान्मातरं ते**
**यत्सम्पर्काद् गुणिषु गणनां पूरुषोऽपि प्रपेदे।**
**संसारार्थं घटयति च या स्यन्दनं तस्य नूनं**
**दैत्येन्द्राजौ दशरथरथं केकयस्येव कन्या॥ १५॥**

**आपृच्छस्वेति।**

१. 'त्या', २. 'ला' ख. पाठः. ३. 'रो' क. पाठः. ४. 'नं' ख. पाठः.
५. परामा' क. पाठः. ६. 'ख्यो' ख. पाठः. ७. 'य' क. पाठः.

निर्गुणं पितरं त्वां च गुणवन्तमकल्पयत् ।
स्वैर्गुणैर्या गुणवती मातरं तां विचारय ॥

आमन्त्र्य मातापितरौ स्नेहाद् बन्धून् सखीनपि ।
अध्वानं यान्ति कर्तार इत्यर्थो ध्वन्यतेऽमुना ॥ १५ ॥

**वायुः सेवां तव शिवपदं[1] गन्तुकामस्य कुर्यात्**
**प्राणापानप्रभृतिभिरसौ वृत्तिभिः सेव्यमानः ।**
**त्रातुं लोकानसुरसमरं धावतो वृत्रशत्रोः**
**प्रेम्णा साक्षात् परमपुरुषो यद्वदंशावतारैः ॥ १६ ॥**

**वायुः सेवामिति ।**

यत्र यत्र मनो याति वायुस्तत्रानुधावति ।
अविनाभाविनावेतौ मनःप्राणौ परस्परम् ॥ १६ ॥

**पाण्डोः पुत्रा हरिमिव सखे! पञ्च बुद्धीन्द्रियाख्याः**
**सेविष्यन्ते पथि सहचरास्त्वां प्रमोदार्घ्यदानैः ।**
**(काम)क्रोधा विषयजनितास्वादतृ[2]ष्णा विपक्षा**
**मोहान्धोत्थाः सपदि शतशो यैर्जिता देवतांशैः ॥ १७ ॥**

**पाण्डोरिति ।**

पाण्डवाः प्रथिताः पञ्च राजसूये महाक्रतौ ।
पूर्णपात्रप्रदानेन यथा विष्णुमवस्थिताः ॥

प्रत्यक्प्रावण्यमापन्नान्यानन्दार्घ्यप्रदानतः ।
सेवेरन्निन्द्रियाणि त्वामात्मयोनेऽन्तरात्मनः ॥

पाण्डवा यमवाय्विन्द्रनासत्याङ्गसमुद्भवाः ।
दिग्वातार्कप्रचेतोश्विदेवतानीन्द्रियाण्यपि ॥

कामादयो विपक्षाः स्युस्तथा दुर्योधनादयः ।
शब्दादयश्च राष्ट्राणि विषया इति भाषिताः ॥
अन्ध[3]त्वाच्च महामोहो धृतराष्ट्रः स्वभावतः ॥ १७ ॥

---

१. 'र', २. 'ह' क. पाठः. ३. 'न्धोऽज्ञत्वान्म' ख. पाठः.

पूर्वं सौम्यां[1] प्रविश पदवीं यामिडामाहुरार्या-
स्तीर्थं यायास्तदनु यमुनाजाह्नवीसङ्गमाख्यम्।
मूलस्थानं नवशशिभृतो नामतः कामरूपं
मुक्त्वा यस्मिन् मृदितकलुषाः कामरूपा भवन्ति॥ १८॥

पूर्वमिति।

सौम्या सोमकलायुक्ता सुसञ्चारा च गच्छ(ता? ताम्)।
प्राणायामक्रमश्चात्र गम्भीरोऽद्य निगद्यते॥
बहिः पिङ्गलया वायुं रेचयेत् सूर्यरूपिणम्।
तमेव पूरयेदन्तस्सोमात्मानं सुधामयम्॥
अ[2]ग्नीषोमात्मकं सम्यक् कुम्भयेच्च सुषुम्नया।
गङ्गाख्या पिङ्गला नाडी यमुनेडा प्रकीर्तिता॥
सरस्वती सुषुम्नोक्ता मूलाधारश्च सङ्गमः॥ १८॥

दीपाका[3]रं द्युतिदलितबाह्यान्त[4]रध्वान्तजालं
मूले पुण्यं फलितमिव नस्तत्सुषुम्नाद्रुमस्य।
लिङ्गं सिद्धैर्विरचितबलि द्रक्ष्यसि प्रायशोऽग्रे
यस्मिन् सिद्धिं समभिलषितां दृष्टमात्रे लभन्ते॥ १९॥

दीपाकारमिति।

मूलाधारे कामलिङ्गं बाणलिङ्गं हृदि स्थितम्।
स्वयम्भुलिङ्गं भ्रूमध्ये पूज्यते योगनिष्ठितैः॥

यथाहुर्महर्षयः—

मध्यमेऽपि हृदयेऽपि ललाटे स्थाणुवज्ज्वलति लिङ्गमदश्यम्।
अस्ति गार्गि! परमार्थमिदं त्वं पश्य पश्य मनसा रुचिरूपम्॥

इति॥ १९॥

आराध्येशं नियमकुसुमैर्वेदपत्रे (य? हृद)ब्जे
प्रादक्षिण्याद् व्रज तमभितो वन्दमानो निषण्णान्।
घ्नन्तं विघ्नान् गणपमखिलोत्तारकं तारकारिं
क्षेत्राधीशं क्षपितदुरितं दुर्गतिघ्नीं च दुर्गाम्॥ २०॥

---

१. 'म्यं', २. 'ग्निष्टोमा' ३. 'र', ४. 'रं' क. पाठः. ५. 'स्मृतिरु' ख. पाठः.

आराध्येशामिति[1]। यथाहुः—

"मूले लिङ्गे च नाभौ हृदि गलकुहरे भ्रूयुगस्यान्तराले
पद्मं वेदर्तुधातुद्युमणिशशिकलाश्रोत्रसंख्यातपत्रम् ।
एतस्मिन् वादिसान्तैर्बलडफक[2]ठ[3]युक्ताविस(र्गा?र्ग)क्षहान्तै-
र्वर्णैर्विद्योतमाने वसति मुहुरसौ हंसरूपी महेशः ॥"

इति ॥ २० ॥

प्रेक्षिष्यन्ते सुकृतसुरभिं प्रस्फुरद्धीविकासं[5]
सिद्धास्त[6]स्मिंश्चिरपरिचितास्त्वां वसन्तं वसन्तम् ।
मन्दं मन्दं तदनु पवनैर्वीज्यमानं सुगन्धैः
स्फूर्जत्कामं प्रचुरपरमानन्दनिष्यन्दपूर्णम् ॥ २१ ॥

प्रेक्षिष्यन्त इति ।

हंसो ज्ञानप्रकाशित्वात् सुरभिः पुण्यकीर्तिभिः ।
अष्टैश्वर्यप्रहृष्टात्मा बन्धुभिः सेव्यतेऽनिलैः ॥

वसन्तकालः सुरभिर्नाम्ना पुष्पविकासकृत् ।
मकरन्दविनिष्यन्दी कामोत्साहसमर्थकः ॥

पुष्प[8]गन्धामिवाहद्भिः(?) सेव्यते मन्दमारुतैः ॥ २१ ॥

दिव्या शक्तिः परमपुरुषप्राप्तये श्रद्दधाना
मूले तस्मिन् निवसति चिरं सा सुषुम्नाद्रुमस्य ।
शोकक्रान्ता जनकतनया प्राग् यथाशोकमूले
तस्यै हर्षं वितरतु भवान् यद्वदार्यो हनूमान् ॥ २२ ॥

दिव्या शक्तिरिति ।

द्वादशान्तशिवप्राप्त्या मूलशक्तिं प्रहर्षय ।
रामाङ्गुलीयदानेन हनूमानिव जानकीम् ॥ २२ ॥

सैषा गौरी सरसबिसिनीकाण्डतन्तूपमाङ्गी
भूतेशेन प्रथितमहसा सङ्गतं प्रार्थयन्ती ।

---

१. 'ति। मू', २. 'ज्ञ' क. पाठः. ३. 'ख' ख. पाठः. ४. 'ठादियु', क. पाठः. ५. 'सः', ६. 'न्त', ७. 'सु', ८. 'रं', ९. 'ष्पा' ख. पाठः.

मूले तस्मिञ् ज्वलितमनलं त्रिः परिक्रम्य सम्यक्
प्रायस्तन्वी चरति सुचिरं तापहन्त्री तपांसि ॥ २३ ॥

सैषेति ।

समाध्यन्ते तिरोभूते कामारौ पाण्डुरा कृशा ।
विरहेणापि तपसा तन्वी गौरी तपस्यति ॥ २३ ॥

अन्यत् कार्यं प्रिय इति वदाम्यादराच्छ्रेयसे ते
कामो भूत्वा कमपि कलयंस्त्वं सुषुम्नेक्षुचापम् ।
स्मेरैः सद्यः पवनविशिखैः सौम्य! निस्तारकः सन्
कुर्याः शक्त्या परशिवतनावैक्यमायुः प्रमत्तः ॥ २४ ॥

अन्यत् कार्यमिति ।

तारकासुरसंहारमूलहेतुर्दिवौकसाम् ।
विवाहान्ते पुनर्भूत्वा शिवावघटयत् स्मरः ॥
सुषुम्नामवलम्ब्य त्वं संसारोत्तारकारकम् ।
प्राणादिभिः समुत्थाप्य मूलशक्तिं शिवं नय ॥ २४ ॥

उद्दीप्याग्निं सपदि पवनैर्मूलकुण्डे ज्वलन्तं
वेणोः पर्वस्विव समभवद् यः[1] सुषुम्नाधमन्याम्[2] ।
वक्रं पूर्वं[3] विहितसरणिं निर्दहन् षड्गुणं तं
सिञ्चेः पश्चाच्छिरसि[4] परमव्योमपीयूषवर्षैः ॥ २५ ॥

उद्दीप्याग्निमिति ।

राजमार्गं वितन्वन्तो दग्ध्वा कान्तारमग्निना ।
सिञ्चन्ति सलिलैर्भृत्याः स्वामिनः समरोद्यमे ॥ २५ ॥

सौषुम्नस्य प्रकृतिगहनं कीचकस्याशु चक्रं
(भी ? भि)त्त्वा पूर्वं भजतु स भवान् भीमसेनेन
[साम्यम् ।

ज्ञानेष्वासं तदनु कलयन्नुत्तराशानुगामी
प्रत्याहर्तुं रिपुविषयतो गोकुलान्यर्जुनः स्यात् ॥ २६ ॥

१. 'यत्' क पाठः. २. 'तत्', ३. 'श्वेत', ४. 'शिरप' ख. पाठः.

सौषुम्नस्येति।

सुषुम्ना वेणुतुल्यत्वान्नाम्ना[1] रक्षश्च कीचकः।
मोक्षमार्गो विराटस्य पुत्रश्चोत्तर उच्यते॥

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते॥

गोकुलानीति कथ्यन्ते पशवश्चेन्द्रियाणि च।
शब्दादयोऽपि विषया राष्ट्रं दुर्योधनस्य च॥ २६॥

**बद्ध्वा मूलं दृढमतितरामप्रवेशाय मृत्यो-**
**रोड्याणाख्यामथच महतीमर्गलां सन्नियम्य।**
**ऋज्वाकारां तदनु च महामुद्रया शक्तिमेनां**
**स्वर्गद्वारं गमय सहसा सौम्य! सौषुम्नरन्ध्रम्॥ २७॥**

बद्ध्वा मूलमिति।

महामुद्रां नभोमुद्रामोड्याणं च जलन्धरम्।
मूलबन्धं च यो वेत्ति स योगी सिद्धिभाजनम्॥

लिङ्गनाभ्योरन्तरालं बन्धयेदनिशं धिया।
उड्डीय याति तेनैव शक्तिरोड्याणपीठकम्॥

गौर्गोमयविसर्गान्ते गुदमाकुञ्चयेद् यथा।
तथैवाकुञ्चयेद् वायुं मूलबन्धोऽयमुच्यते॥

तिष्ठेत् पद्मासने[2] नित्यमृजुकायशिरोधरः।
प्रसुप्तसर्पवच्छक्ति(वे ? वें)ष्टिताङ्गी भवेदृजुः॥

द्वारं[3] स्वर्गस्य सौषुम्नं[4] मूलेऽर्धच्छिन्नवंशवत्।
ब्रह्मरन्ध्रं[5] तु मोक्षस्य द्वारमाहुः शिरोगतम्॥ २७॥

**सम्पूर्णेन्दुद्युतिसहचरीं हंसरूपां सखे! त्वं**
**वाचां[6] देवीं पथि वहसि चेद् वाञ्छितार्थोपलब्ध्यै[7]।**

---

१. 'डी', २. 'र्के', ३. 'रः', ४. 'म्रमूलोर्ध्वच्छिन्नपाश', ५. 'न्ध्रस्तुमो', ६. 'चं', ७. 'ब्धिः' ख. पाठः.

उत्पश्यामि स्फुटदशमुखप्राणयुक्तं भवन्तं
रक्षोनाथं निजकरसमुत्क्षिप्तकैलासमूर्तिम् ॥ २८ ॥
सम्पूर्णेति ।
प्राणाद्यो वायवश्च बलं च प्राण उच्यते ।
रक्षोनाथसमप्राणं त्वामुत्पश्यामि रावणम् ॥ २८ ॥

मार्गं सम्यक् प्रवितर्तमृजुं मध्यमं संश्रयेथा
मुञ्चन्नन्यावधिककुटिलौ दक्षिणं चोत्तरं च ।
याभ्यां गत्वा दिवि च नरके प्राणिवर्गः प्रकामं
यातायातैर्जननमरणैः खेदयत्यात्मरूपम् ॥ २९ ॥
मार्गमिति ।
इडानाड्युत्तरे पार्श्वे पिङ्गला दक्षिणे स्थिता ।
ताभ्यां गता न जानन्ति मोक्षं विषयमोहिताः ॥ २९ ॥

यद्येकं वा प्रविशसि तयोर्मार्गयोस्त्वं प्रमादाद्
वैरी मोहो विषयकलुषस्त्वां जयेदक्षकेल्या ।
धर्मात्मानं स इव शकुनिः पाण्डुपुत्रं सभायां
पुण्यश्लोकं नलमपि यथा पुष्करो ज्ञातिभावात् ॥ ३० ॥
यद्येकमिति ।
अक्षकेलिरिति प्रोक्ता द्यूतक्रीडा छलोत्तरा ।
इन्द्रियाणां प्रवृत्तिश्च विषयेषु प्रधावताम् ॥ ३० ॥

मोहे लाक्षागृह इव तदा दह्यमाने समन्तात्
सौषुम्नं तत् प्रविश सुषिरं वृत्तिभेदैश्च शक्त्या ।
मात्रा सुप्तैः सह च सहजैर्भीमसेनः सुरुङ्गां
यद्वत् प्राप्तो विदुरगुरुणा पूर्वमेवोपदिष्टाम् ॥ ३१ ॥
मोह इति ।
दह्यमाने महामोहे निर्विकल्पसमाधिना ।
सुप्तैः सङ्कल्पमुख्यैश्च मात्रा शक्त्या च संयुतः ॥

१. 'भुजस', २. 'श' ख. पाठः. ३. 'त्तिं च वि' क., 'त्तिश्च मात्रा' ख. पाठः.

विदुषा गुरुणादिष्टः सुषुम्नागह्वरं विशेत् ।
लाक्षागृहे दह्यमाने शठैर्दुर्योधनादिभिः ॥
प्रसुप्तां मातरं भ्रातॄन् बिभ्रद् भीमः पुरा यथा ।
सुरुङ्गां विदुरेणादावुपदिष्टां प्रविष्टवान् ॥ ३१ ॥

**सिद्धिप्राप्त्यै बिलमिव हठात् साधका बद्धधैर्या**
**हंसाः शक्त्या विदलितमिव क्रौञ्चरन्ध्रं गुहस्य ।**
**आधारोद्यज्जरठ[1]भुजगीवासवल्मीकरन्ध्रं**
**प्राप्तो भूया[2]स्तदनु तपसा त्वं च वाल्मीकितुल्यः ॥ ३२ ॥**

**सिद्धीति ।**

वल्मीकावृतसर्वाङ्गो वाल्मीकिर्निश्चलो यथा ।
चिरकालं समाधिस्थस्तथा त्वं निश्चलो भव ॥ ३२ ॥

**मेरुं पश्चात् प्रविश सकलज्योतिषामेकवासं**
**यं सर्वात्मा धनुरिव द[3]धद् ध्यानयानाधिरूढः ।**
**सत्त्वं नाम्ना रज इति तमश्चेति तिस्रः पुरीस्ताः**
**सन्धाय त्वां शरमिव मनः सत्वरं निर्ददाह ॥ ३३ ॥**

**मेरुमिति ।**

इषुकारो यथा सम्यगिष्वासक्तमनस्तया ।
समीपेनापि गच्छन्तं राजानं नावबुद्धवान् ॥
वीणादण्डं महामेरुमवष्टभ्येषु[5]साधनम् ।
हे मनस्त्वां समाधाय सर्वात्मा निर्गुणोऽभव[6]त् ॥ ३३ ॥

**मेरोरस्य त्वयि सति गते सिंहबुद्ध्या गुहां ता[7]ं**
**भीतिर्भूयाद् विषयविपिने नूनमाशागजानाम् ।**
**हंसीवासौ सुकृतसलिलं मानसं त्वामवाप्ता**
**स्वाधिष्ठानं सरसिजमथो संश्रयेद् दैवयोगात् ॥ ३४ ॥**

---

१. 'ठरभु' क. पाठः. २. 'याः प्रबलत', ३. 'म' ख. पाठः. ४. 'पि' क. पाठः. ५. 'ष्ट' ख. पाठः. ६. 'व।' क. पाठः. ७. 'ताद् भू' ख पाठः.

मेरोरिति ।

त्वयि प्रत्यङ्मुखीभूते विषयारण्यगोचरात् ।
भोगापेक्षा मदोद्रिक्ता निवर्तन्ते स्वभावतः ॥
इयं च हंसी शक्तिस्त्वां पूर्णपुण्याम्बुमाश्रिता ।
क्रमेण धारणायोगाद् द्वितीयाधारमाश्रयेत् ॥
वर्षासु लौकिकी हंसी प्रसन्नसलिलं यथा ।
सरो मानसमासाद्य स्वावासं पद्ममाश्रयेत् ॥ ३४ ॥

**सन्ध्यामेघप्रतिभटरुचौ स्वालयाम्भोजमध्ये**
**विद्युल्लेखां तदनु च चिरस्थायिनीं वन्दमानः ।**
**साक्षाल्लक्ष्मीमिव हृदि हरेः कौस्तुभाभापिशङ्गे**
**सम्यग् यायाः सुरभिकुसुमस्वर्द्रुमैः सौम्य! सौम्यम् ॥**

सन्ध्येति ।

नीलाम्भोदावलीवेल्लद्विद्युद्वल्लीनिभप्रभाम् ।
नीवारशूकवत् सूक्ष्मां दीपज्वालामिव स्मरन् ॥
प्राप्याणिमाद्यमैश्वर्यं त्यागभोगक्षमो भवेत् ।
ब्रह्माद्याः शिवपर्यन्ताः षडाधाराधिदेवताः ॥
लक्ष्म्यात्मिकेयं शक्तिश्चेत्युपमानेन सूच्यते ॥ ३५ ॥

**तस्माद् गच्छेर्मणिमयमथो मण्डपं सिद्धवन्द्यं**
**यस्मिन् नत्वा मरतकमणिश्यामवर्णामपर्णाम् ।**
**स्रष्टुं पातुं भुवनमखिलं हन्तुमीशिष्यसे त्वं**
**किं किं यायान्नखलु सुकृती लक्षितस्तत्कटाक्षैः ॥ ३६ ॥**

तस्मादिति ।

मणिपूरकमध्यस्थां रुद्रशक्तिमिमां स्मरन् ।
शिवसारूप्यमासाद्य भवान् सृष्ट्यादिकृद् भवेत् ॥ ३६ ॥

**क्षिप्त्वा सद्यः कलुषमहिषं क्षान्तसर्वापराधा**
**देवी दुर्गा भवदभिमतं प्रापयेत् तत्र सम्यक् ।**
**कामाल्लेभे युधि करुणया नूनमस्याः किरात्याः**
**कामारातौ भृशमनुचितान्याचरन्नर्जुनोऽपि ॥ ३७ ॥**

---

१. 'मा', २. 'सेव्यं य' ख. पाठः.

क्षिप्त्वेति ।

दुर्गेति भद्रकालीति विजया वैष्णवीति च ।
कीर्त्यते शक्तिरेकैव कार्यार्थमवतारतः ॥ ३७ ॥

कालीं कालाम्बुदनिभरुचिं (त्वां ? तां) सकृत् तत्र नत्वा
प्राप्तासि त्वं प्रथितमहसः कालिदासस्य कीर्त्तिम् ।
सूक्तिज्योत्स्नास्रुतिविततिभिः स्वर्धुनीस्पर्धिनीभिः
श्राव्यं काव्यं भुवि रचयतां[2] मातृका यत्प्रबन्धाः ॥ ३८ ॥

कालीमिति ।

किञ्चिन्निमित्तमाश्रित्य कालिदासं महाकविम्
उपश्लोकयितुं प्राह कविः श्लोकं सुबोधकम् ॥ ३८ ॥

ऊर्ध्वं नाभिं कर[3]णविधिना तालु सन्धाय चाधो
यत्र प्राणैर्विरचितचतुष्पीठवेधप्रकाराः ।
प्रत्याहर्तुं[4] हुतवहमुखादिन्दुपीयूषधारां
प्रत्याहाराभ्यसनविधिना योगिनोऽन्तर्यतन्ते ॥ ३९ ॥

ऊर्ध्वं नाभिमिति ।

तालुमूलस्थितश्चन्द्रो नाभिमध्ये दिवाकरः ।
अमृतं चन्द्रबिम्बस्थं विषं सूर्ये प्रतिष्ठितम् ॥

वर्षत्यधोमुखश्चन्द्रो ग्रसत्यूर्ध्वमुखो रविः ।
यत् प्रत्याहरणं तस्य प्रत्याहारः स उच्यते ॥

समहस्तयुगो भूमौ समपादयुगस्तथा ।
वेधयेत् क्रमयोगेन चतुष्पीठं तु वायुना ॥ ३९ ॥

प्राप्य तस्मादुपरि पुरुषैः पूर्णपुण्यैर्भजेथाः
स्थानं सिद्धैर्विनतममलं पूर्णगिर्यालयं तत् ।
देवी दद्यात् तदनु भवते मङ्गलं मङ्गला[6]म्बा
सिद्धिं दिव्यौषधरसवशीकारसिद्धाञ्जनानाम् ॥ ४० ॥

---

१. 'त्वं' ख. पाठः. २. 'ता' क. पाठः. ३. 'रु' ख. पाठ. ४. 'रा'
५. 'गे तथा' क. पाठः. ६. 'लं वा सि' ख. पाठः.

प्राप्यमिति ।

अनाहताख्यमाधारं पीठं पूर्णगिरिं विदुः ।
मङ्गलानि प्रदद्यात् ते संस्मृता सर्वमङ्गला ॥ ४० ॥

**स्थाने तस्मिन् हृदयकमलं बोधयन् सारथिस्त्वं**
**जीवादित्यं समुपचर मां शार्ङ्गधन्वेव पार्थम् ।**
**योऽसौ सप्तस्वरहययुते स्यन्दनेऽनाहतेऽस्मि-**
**न्नेकं चक्रं वसति घटयन् द्वादशारं त्रिनाभि ॥ ४१ ॥**

**स्थाने तस्मिन्निति ।**

प्रभाते बाधयन् पद्ममादित्यस्य यथारुणः ।
सारथ्यं कुरुते तद्वत् त्वं स्या जीवस्य सारथिः ॥
मन्देहप्रमुखैर्दैत्यैर्नामतश्चाप्यनाहते ।
अश्वैरिव स्वरैर्युक्ते जीवादित्यो विराजते ॥
आयुःप्रदायकं जन्तोः कालचक्रं प्रवर्तयन् ।
भवद्भूतभविष्यद्भिरंशैः कल्पितनाभिकम् ॥
अरैरिव द्वादशभिर्मासैः संवत्सरात्मकम् ।
अनाहताधारपद्मं दलैर्द्वादशभिर्युतम् ॥
तस्य तेजस्त्रयं नाभिर्गुरुत्रयसमन्वितम् ॥ ४१ ॥

**त्वय्येवैष स्फुरति बहुधा मायया तारतम्याद्**
**यत्सान्निध्याच्चलसि विषयेष्विन्द्रियैः सार्धमन्यैः ।**
**अध्यारोप्य भ्रम(ति ? सि) च गुणांस्तद्गतान् निर्गुणः स-**
**न्नप्सु स्थायी चल इति यथा तद्गुणो दृश्यतेऽर्कः ॥ ४२ ॥**

**त्वयीति ।**

देवतिर्यङ्मनुष्यात्मा तत्तन्मनसि भासते ।
मनोधर्मं च देवोऽहमित्याद्यात्मनि कल्पयन् ॥ ४२ ॥

---

१. 'थ', २. 'ह' क. पाठः. ३. 'भिम् ॥', ४. 'येत् प' ख. पाठः, ५. 'य', ६. 'ग' क. पाठः. ७. 'र्यैत्तजी', ८. 'भिः स्मृ', ९. 'भिगुणत्र' ख. पाठः.

मन्युं बुद्ध्या स्वधितिशितयालभ्य हृद्यूपबद्धं
　पीत्वा सोमाद् गलितममृतं संविदग्नौ च हुत्वा ।
अन्तर्यागं यदि वितनुयाच्छ्रद्धया जीवयज्वा
　सार्धं ज्ञानेन्द्रियपरिकरैस्त्वं भवाध्वर्युरस्य ॥ ४३ ॥

मन्युमिति ।

श्रद्धा पत्नी पशुर्मन्युः शस्त्रं स्वधितिरुच्यते ।
आग्नीध्राद्याः परिकराः सोमो वल्ली निशाकरः ॥ ४३ ॥

आलम्ब्यास्मिन्नधिकमधुरं सौम्य! सौषुम्नवंशं
　गोभिः श्लिष्टः सपदि विषये शाड्वले निःस्पृहाभिः ।
मायानीलाम्बरपरिवृतं ह्लादयंस्त्वं पुमांसं
　नादं कुर्वन्ननुकुरु सखे! गोपवेषं मुकुन्दम् ॥ ४४ ॥

आलम्ब्येति ।

आत्मनः परितोषार्थमन्तर्नामाभ्युदीरयन् ।
वेणुनादं यथा कृष्णो विधत्ते रामतोषकम् ॥ ४४ ॥

नूनं तस्मिन् हृदयकमलालाबुकोद्भासमानं
　वीणादण्डं कमपि कलयन् सप्ततन्त्रीमनोज्ञम् ।
नामोंकारश्रुतिगतिवशान्नन्दिताशेषलोकं
　नादं कृत्वा त्वमपि भविता नारदप्रेक्षणीयः ॥ ४५ ॥

नूनमिति ।

मन्द्रमध्यमतारेषु त्रिषु स्थानेषु तारणी ।
स्वर्यारोह्यवरोह्याद्या श्रुतीनां गतिरुच्यते ॥ ४५ ॥

नानारूपान् निजसमुदितान् दर्शयन् जातिभेदां-
　स्तस्मिन् नादः क्षपणकसमः सप्तभङ्गीं भजेत् सः ।

---

१. 'य त्वं पु', २. 'रामं यद्वन्ननु मम स', ३. 'षो', ४. 'न्दः', ५. 'दा' ख. पाठः. ६. 'दः', ७. 'द्याः' क. पाठः.

यस्मिन् कर्माष्टकनियमितः संवृते पञ्जरेऽस्मिन्
भिन्ने जीवः शुक इव सदा यात्यलोकान्तरिक्षम् ॥ ४६ ॥

नानारूपानिति ।

शुद्धसालगसङ्कीर्णरागाणां मिश्रणोद्भवाः ।
आहुर्भरतशास्त्रज्ञा जातीरष्टादशात्मिकाः ॥
षड्जर्षभौ च गान्धारौ मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च स्वराः सप्त प्रकीर्तिताः ॥
घण्टादुन्दुभिशङ्खाब्धिवेणुवीणालिसन्निभाः ।
कम्पितः स्फुरितो लीनस्त्रिभिन्नस्त्रिरिपुस्तथा ॥
आन्दोलिताहतौ स्थायीत्यष्टौ कर्माणि गायताम् ।
यमश्च नियमः पश्चादासनं प्राणसंयमः ॥
प्रत्याहारो धारणा च समाधिर्ध्यानमष्टमम् ।
श्रुत्याकारशरीरत्वं ब्रह्मणस्तूपदश्यते ॥
ब्रह्मप्राप्तिं च जीवस्य मोक्षमाहुर्मनीषिणः ।
सप्तार्हतानां तत्त्वानि जीवोऽजीवस्तथास्रवः ॥
संवृतिर्निर्जरा बन्धो मोक्षः सप्तम उच्यते ।
जीवः प्रकाशी शुद्धः स्यादजीवस्तद्विलक्षणः ॥
आस्रवन्ति यतो धर्माः स स्यादास्रव आगमः ।
यया संव्रियते जीवस्तां मायां संवृतिं विदुः ॥
निर्जीर्यते यया कर्म निर्जरा व्रतधारणा ।
केशानां लुञ्छनं तप्तशिलारोहणमित्यपि ॥
स्वपङ्कमलधारित्वमित्याद्या व्रतधारणा ।
कर्माष्टकसमारब्धे शुकपञ्जरसन्निभे ॥
पुंसो देहे स्थितिर्बन्धः शुकस्येव स्वपञ्जरे ।
सततोर्ध्वगतिर्मोक्ष आकाशे चोपरिस्थिते ॥
कालः पञ्चास्तिकायाश्च षट् तत्त्वानीति केचन ।
जीवः पुद्गल आकाशो धर्मोऽधर्मोऽस्तिकालकः ॥

स्यादस्ति विश्वं स्यान्नास्ति पुनः स्यादस्तिनास्ति च ।
स्यादवक्तव्यमित्येवं चतस्रो भङ्गय ईरिताः ॥
स्यादस्त्यवक्तव्यं च स्यान्नास्त्यवक्तव्यमित्यपि ।
स्यादस्ति नास्त्यवक्तव्यमिति स्युः सप्त भङ्गयः ॥
कथञ्चिच्छब्दपर्यायः स्याच्छब्द इति बुध्यताम् ।
प्राग्ज्ञानावरणीयं च दर्शनावरणीयकम् ॥
आन्तरायिकमायुष्कं नामिकं गौत्रिकं तथा ।
मोहनीयं वेदनीयमिति कर्माष्टकं विदुः ॥
अनेकान्तात्मकत्वस्य ग्राहकं ज्ञानमुच्यते ।
ज्ञानमाव्रियते ज्ञानावरणीयेन कर्मणा ॥
दर्शनावरणीयं तु यत्तज् ज्ञाननिवारकम् ।
क्रियते श्रेयसे विघ्न आन्तरायिककर्मणा ॥
आयुरल्पं महद्वा स्यादायुष्केणैव कर्मणा ।
नामानि भद्राभद्राणि प्राप्यन्ते नामिकेन च ॥
वंशा उच्चावचाः पुंभिर्लक्ष्यन्ते गौत्रिकेन च ।
हिताहितं न जानन्ति मोहनीयेन जन्तवः ॥
सुखं दुःखं च वेद्येते वेदनीयेन कर्मणा ।
एभिरुच्चावचानि स्युः पुद्गलानि शरीरिणः ॥
पूर्यते गलतीत्याभ्यां शरीरं पुद्गलं विदुः ॥ ४६ ॥

**देशं जालन्धरमथ विशंस्तत्र विश्रम्य किञ्चित्**
**सिद्धैः सेव्यां तदनु गहने खेचरीं प्राप्य वृत्तिम् ।**
**नत्वा देवं त्रिभुवनगुरुं लम्बिकायां निषण्णं**
**भ्रूमध्ये त्वं वस शुचिरिव त्र्यम्बकस्यालिकाक्षिण ॥ ४७ ॥**

**देशं जालन्धरमिति ।**

विशुद्धिसंज्ञमाधारं देशं जालन्धरं विदुः ।
पञ्चाशद्वर्णरूपा वाग् वर्तते यत्र वैखरी ॥

१. 'पीठं जा' ख. पाठः. २. 'वा व' क. पाठः.

कपालकुहरे जिह्वा प्रविष्टा विपरीतगा ।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥
न क्षुधा न तृषा निद्रा नालस्यमुपजायते ।
भवेत् स्वच्छन्दमृत्युश्च यो मुद्रां वेत्ति खेचरीम् ॥
अजागलस्तन इव या तालुन्यवलम्बते ।
आस्तेऽस्याममृतस्रावी लम्बिकायां त्रियम्बकः ।
आज्ञासंज्ञं भ्रुवोर्मध्ये विदुराधारमुत्तमम् ॥
तस्मिन् स्वायम्भुवं लिङ्गं बिन्दुरूपं प्रकाशते ।
ओड्याणपीठमाब्रह्मरन्ध्रमाहुरतः परम् ॥ ४७ ॥

**कैलासाख्यं तदुपरि पुनः कोटिचन्द्रप्रतीक्ष्यं**
**स्थानं गत्वा विहर सुचिरं स्वेच्छया स्वच्छवृत्तिः ।**
**शम्भोर्नित्यं विहितवसतेस्तत्र मौलीन्दुरेखा-**
**ज्योत्स्नाधारापरिचयवशाद् यापयन्नध्वखेदम् ॥ ४८ ॥**

**कैलासाख्यमिति ।**

घनीभूतघृताकारं यन्मास्तिष्कं शिरोगतम् ।
केचित् तदमृतं प्राहुः केचिल्लालाजलं विदुः ॥ ४८ ॥

**स्थित्वा तस्मिन् प्रियसख ! चिरं निर्मलंज्ञानरूपे**
**दृश्यं स्वप्नप्रतिनिधि जडं नेति नेति व्यपोह्य ।**
**त्यक्त्वा पिण्डं तदुपरि पदं तत्परस्ताच्च रूपं**
**रूपातीते विहर परमे व्योम्नि निस्सीमभूम्नि ॥ ४९ ॥**

**स्थित्वा तस्मिन्निति ।**

देहेन्द्रियमनःप्राणबुद्ध्यहङ्कारसञ्चयम् ।
देहं दृश्यं जडं स्वप्नतुल्यं नाहमिति त्यज ॥
पिण्डं कुण्डलिनी शक्तिः परहंसः प्रकीर्तितः ।
नादो रूपमिति प्रोक्तो रूपातीतः परः शिवः ॥ ४९ ॥

---

१. 'लं' ख. पाठः

देशो तस्मिन् सकलजगतां सौम्य! विश्रान्तिभूमिः
शम्भोर्लोकः शिशिरकिरणश्लिष्टसौधप्रवाहम् ।
यस्मिन् भक्तिर्निवसति मम प्रेयसी तं[1] प्रपन्नं
द्रक्ष्यस्यच्छस्फटिकधवलं द्वादशान्तेऽतिशान्ते ॥ ५० ॥

देशो तस्मिन्निति ।

स्वरूपं लोक[2]शब्दोक्तं तत्त्वानामवलोकनात् ।
श्लेषेण पुण्यलोकश्च ध्वन्यते भोगमोक्षदः ॥

चन्द्रामृतमयं स्रोतः सौधमित्यभिधीयते ।
प्रासादोऽपिच तुङ्गत्वादिन्दुबिम्बावलम्बनम्[3] ॥ ५० ॥

इति हंससन्देशे सव्याख्ये पूर्वसन्देश समाप्तः ॥

---

१. 'तत्' ख. पाठः. २. 'शब्दलोकोक्तं' क. पाठः. ३. 'नः' ख. पाठः.

अथोत्तरसन्देशः।

शक्तियोगः शरीरान्तः संक्षिप्तः सकलोऽमितः।
शाम्भवो निष्कलो योगः शरीरोपरि सूच्यते॥

ब्रह्माण्डं[1] तद्गतमपि ततश्चोर्ध्वमम्भोग्निवायु-[2]
व्योमान्येषां विकृतिवितती[3]स्तत्प्रधानं पुमांसम्।
मायाविद्ये सविधिसमये बिन्दुनादौ च शक्तिं
पूर्वं पूर्वं दशशतगुणान् व्यापकान् व्याप्य भान्तम्॥१॥

ब्रह्माण्डमिति।

व्यवधातुमशक्यत्वाद् विस्तीर्णत्वात् समन्ततः।
अन्तर्बहिरपि व्याप्तमाब्रह्माण्डपिपीलिकम्॥ १॥

विश्वस्रष्टा विधिरपि पुरा द्रष्टुकामो यदन्तं
हंसाकारश्चिरमुपरि चोड्डीय नाभूत् समर्थः।
आदिं तद्वत् प्रलयजलधौ क्लृप्तकेलिर्वराहो
यद्दंष्ट्राग्रे क्षितिरियमभूत् पङ्कलेशप्रतीक्ष्या॥ २॥

विश्वस्रष्टेति।

हरिर्ब्रह्मा च यस्यान्तं नालमास्तां निरीक्षितुम्।
तस्येयत्तां परिच्छेत्तुं कः क्षमेताल्पधीर्जनः॥ २॥

निस्त्रैगुण्ये निखिलदुरितक्लेशविच्छेदहेतौ
नित्यानन्दोल्लसितविभवे निष्कले निर्विकल्पे।
निर्धूतांहस्तिमिरपटले निर्मलज्ञानरूपे
यस्मिन् प्राप्ते न खलु पुनरावर्तते जीवलोकः॥ ३॥

निस्त्रैगुण्य इति।

स्वर्गाद्या ब्रह्मलोकान्ता याः प्रोक्ता भोगभूमयः।
भोगे भुक्ते भवन्त्येताः पुनर्जननहेतवः॥ ३॥

यत्राबुद्धे स्फुरति बहुधा क्षुद्रविश्वेन्द्रजालं
मूकस्वप्नप्रतिनिधि जगद् यत्र बुद्धेऽस्तमेति।

---

१. 'ण्डान्तर्गत', २. 'धि', ३. 'ह' क. पाठः.

ध्यानारूढैः कथमपि धिया योगिभिर्गम्यमानं
न व्याहर्तुं निगमवचसो वैभवं यस्य शक्ताः ॥ ४ ॥

यत्राबुद्ध इति ।

लोकावगतसामर्थ्यः[1] शब्दो वेदेऽपि बोधकः[2] ।
लौकिकैर्गृह्यते शब्दैः सङ्गतिर्न[3] निरंशके[4] ॥ ४ ॥

तत्त्वान्यादौ त्रिभुवनसृजो यस्य षट्त्रिंशदासन्
यस्मिन्नेतान्यथ च भुवनान्युद्गतानि द्विसप्त ।
वर्णा यस्मिन् वशषसमुखाः किञ्च पञ्चाशदासन्
यत्रानन्तं पदमुदभवन्मन्त्रजालस्य मूलम् ॥ ५ ॥

तत्त्वान्यादाविति ।

इदमित्थमिति ज्ञातुं[5] निरंशत्वान्न शक्यते ।
तथापि लक्ष्यते[6] युक्त्या तत्त्वानां प्रभवत्वतः ॥ ५ ॥

शोचिष्केशः शिशिरकिरणो भानुमाली च यस्मिन्
सर्वोत्कृष्टे स्वमहसि दिवादीपसाम्यं भजन्ति ।
भासा यस्य त्रिभुवनगृहाभ्यन्तरं भासयन्ते
भानोर्यद्वत् प्रतिफलनतो दर्पणं गह्वराणि ॥ ६ ॥

शोचिष्केश इति ।

स्वयम्प्रकाशं तद्वस्तु प्रकाशैर्न प्रकाश्यते ।
प्रकाशास्तत्प्रकाशेन प्रकाशन्ते प्रकाशिताः ॥ ६ ॥

यस्मिन् दृष्टे त्रिभुवनमसत् सच्च यस्मिन्नदृष्टे
यश्चालम्बः सकलजगतां यो निरालम्बनश्च ।
विश्वस्यादिर्य इह न पुनर्विद्यते यस्य चादि-
स्तद्भूमानं क इव भुवने स्युः परिच्छेत्तुमीशाः ॥ ७ ॥

यस्मिन् दृष्ट इति ।

अस्ति नास्तीति वा वक्तुं यद् वाचामवलम्बनम् ।
तच्चेन्नास्ति कथं वाचां प्रवृत्तिः सम्भविष्यति ॥ ७ ॥

---

१. 'र्थ्यै', २. 'धितः।', ३. 'ङ्ग', ४. 'कः' क. पाठः. ५. 'तुमिदंश' ख. पाठः. ६. 'व' क. पाठः.

चन्द्रादित्याद्यविदितमपि प्रेक्षसे सर्वगस्त्वं
सोऽयं लोकः सकलभुवनव्यापकः शङ्करस्य।
अन्तर्यामी त्वमपि जगतां सोऽपि तस्मादवश्यं
सादृश्यं ते प्रथयतितरां यस्तु तैस्तैर्विशेषैः ॥ ८ ॥

चन्द्रादित्याद्यविदितमिति।

लोकालोकाद्रिपर्यन्तः प्रकाशैश्चन्द्रसूर्ययोः।
हे मनस्त्वमिहस्थोऽपि ततः परमपीक्षसे ॥ ८ ॥

सत्यं ज्ञानं सकलभुवनाधारमाधारशून्यं
सन्तं सूक्ष्मं निरुपममजं निर्विकारं निरीहम्।
शुद्धं शान्तं निरुपमरुचिं स्वच्छमानन्दरूपं
व्याप्ताशेषं विगतकलुषं त्वां तमेव स्मरामि ॥ ९ ॥

सत्यमिति।

सन्देशशेषं निर्वोढुं काङ्क्षता कविना पुनः।
किञ्चित् साम्यं समाश्रित्य तत्त्वेन सह रूप्यते ॥ ९ ॥

तस्मिंश्चान्द्रं विलसति चिरं मण्डलं नित्यपूर्णं
यन्निष्यन्दामृतपरिगता दीर्घिका दीर्घमास्ते।
आप्लुत्यास्यामपनय चिरादध्वखेदं सखे! त्वं
पीत्वा मृत्युं तरति सहसा पूरुषो यत्र बिन्दुम् ॥ १० ॥

तस्मिन्निति।

पूर्णेन्दुबिम्बानिष्यन्दिपीयूषरसधारया।
पूर्णं पद्माकरं ध्यायेद् भावनामात्रगोचरम् ॥ १० ॥

तस्मिन् संवित्सरसिजमथो सप्तकोटिच्छदाढ्यं
द्रक्ष्यस्यन्तर्विलसितकलारूपकिञ्जल्कयुक्तम्।
मध्ये यस्य स्फुरति महती कर्णिका स्वर्णरूपा
यन्निष्यन्दामृतमिह मुहुस्त्वादृशाः प्रार्थयन्ते ॥ ११ ॥

तस्मिन् संविदिति।

सप्तकोटिमहामन्त्रा दलास्तद्देवताः कलाः।
प्रणवः शोभनो वर्णः स्वर्णशब्देन कीर्त्यते ॥ ११ ॥

---

१. 'य', २. 'कं दीपयन्तः', ३. 'शा', ४. 'का' ख पाठः. ५. 'य' क. पाठः. ६. 'सवामि' ख. पाठः. ७. 'मुद्राद' क. पाठः. ८. 'कथ्यते' ख. पाठः.

सत्ता यस्य स्थिरपरिमलः केसरा नादरूपाः[1]
स्फूर्तिर्विद्यास्फुरणमणवो रेणवोऽत्यन्तसूक्ष्माः ।
पद्मे तस्मिन् परमरसवत्कर्णिकाबिन्दुपीठे
स्वैरं भृङ्गाविव विहरतो दम्पती तौ पुराणौ ॥ १२ ॥

सत्तेति ।

स्फूर्तिर्विकासो विद्येति मालामन्त्रः प्रकीर्त्यते ।
अर्णवस्तूपमन्त्राः[2] स्युरानन्दः परमो रसः ॥ १२ ॥

द्रक्ष्यस्यन्तःपुरमपि परं शाङ्करं दैवयोगाद्
यत्प्राकारास्त्रय इह मतिप्राणदेहा भवन्ति ।
द्वारेष्वस्य प्रियसख! भज त्वं निवृत्तिं प्रतिष्ठां
विद्यां शान्तिं तदनु च कलामूर्ध्वगां शान्त्यतीताम् ॥

द्रक्ष्यस्यन्तःपुरमिति ।

प्राकाराः स्युस्त्रयः कोशा अन्नप्राणमनोमयाः ।
स्याद् विज्ञानमयः शक्तिरानन्दमय ईश्वरः ॥ १३ ॥

या सा तस्मिन् निवसति परा पञ्चवक्त्रा कलाभि-
र्मूलान्नीता प्रसभमपरा त्वं तया योजयाशु ।
शक्तिश्चासौ तदनु यमुनासङ्गता जाह्नवीव
ज्ञानाम्भोधिं शिवमभिविशेत् तत्र कारुण्यपूर्णम् ॥१४॥

या सा तस्मिन्निति ।

सावित्र्युद्ध्रियते मन्त्रः पराख्यो बिन्दुसंयुतः ।
एतन्मन्त्रप्रभावेन जायते मनसो लयः ॥ १४ ॥

प्रासादेऽस्मिन् भज पशुपतिं पद्मकोशप्रकाशे
पञ्चब्रह्मस्फुरणविलसत्पञ्चवक्त्रं प्रसन्नम् ।
ओङ्काराख्ये विहितवसतिं सर्वदा वर्णपीठे
हाहाहूहूस्तुतिषु मुदितं देवमौदार्यशीलम् ॥ १५ ॥

प्रासादेऽस्मिन्निति ।

प्राकारमन्त्रस्योद्धारो[3] हकारोकारबिन्दुभिः ।
सौधस्थलं[4] च प्राकारो विहारगृहमीशयोः ॥

---

१. 'नन्दरूपा स्फू' ख. पाठः. २. 'वर्णस्तू' क. पाठः. ३. 'सादम', ४. 'पञ्चप्रासादो वि' ख. पाठः.

अतः परं प्रसन्नार्थो ग्रन्थशेषोऽतिकोमलः ।
स्तूयते मनसः स्थित्यै सगुणं ब्रह्म केवलम् ॥ १५ ॥

ईशानं तत्पुरुषमुपरिद्वारि पूर्वे च नत्वा
दक्षेऽघोरं दलितदुरितं वामतो वामदेवम् ।
सद्योजातं भज चरमतः पूर्वतो नन्दिकेशं
मूर्तां गङ्गामपि च यमुनां श्रीमहाकालदेवम् ॥ १६ ॥

ईशानमिति ।

पञ्चब्रह्मतनोरंशाः पञ्चभूताधिदेवताः ।
पञ्चकृत्यविधातारः प्रासादस्य प्रवेशकाः ॥ १६ ॥

सान्द्रानन्दामृतजलनिधौ धर्मकामार्थवीच्यां
तत्त्वद्वीपे विविधभुवनोद्यानविद्योतमाने ।
वर्णैः कीर्णे सुरविटपिभिर्मण्डपे मन्त्ररूपे
शक्त्या सार्कं विहरति शिवः श्रेयसामेष दाता ॥ १७ ॥

सान्द्रानन्देति ।

कथञ्चिदालम्बयितुं मनो निरवलम्बनम् ।
लक्षणैर्लोकसंसिद्धैर्लक्ष्यते वस्तु लौकिकम् ॥ १७ ॥

देवैः सिद्धैर्मुनिभिरभितः किन्नरैरप्सरोभिः
सङ्गीताद्यैर्बहुमुखरसैः सेव्यमानो विनोदैः ।
अष्टैश्वर्यस्फुरणमहितोऽप्यष्टमूर्तिर्नितान्तं
गौरीगात्रव्यतिकरभुवा रोचिषा रोचतेऽसौ ॥ १८ ॥

देवैरिति ।

तिष्ठन्त्वनन्यसामान्याः सर्वज्ञत्वादयो गुणाः ।
अनन्तशक्तिम(त्पं ? त्त्वं) यत् तद्धि वैभवमैश्वरम् ॥ १८ ॥

मौलौ कुन्दोल्लसितमलकं सेन्दुलेशं कपर्दं
काश्मीराङ्कं तिलकमलिके लोचनं सस्फुलिङ्गम् ।
कण्ठे कालागरुमपि च यः कालकूटं च धत्ते
क्षौमं कृत्तिं जघनपुलिने नूपुरं व्यालमङ्घ्रौ ॥ १९ ॥

---

१. 'दा' ख. पाठः. २. 'प', ३. 'णैः', ४. 'कैः ॥', ५. 'पनः का' क. पाठः.

मौलाविति ।

परस्परविभिन्नार्थक्रियालक्षणयोरपि ।
अनन्तशक्तेरीशस्य प्रभावादैक्यमिष्यते ॥

एकलक्षणयोरैक्यं सच्चिदानन्दरूपयोः ।
को निवारयितुं शक्तो जीवात्मपरमात्मनोः ॥ १९ ॥

**मार्कण्डेयो मुनिरिव विभोस्तस्य कृत्वा सपर्यां**
**तत्कारुण्यादतितर सखे! मृत्युमत्युग्ररूपम् ।**
**पातुं लोकान्[1] जलधिमथने यः[2] पिबन् कालकूटं**
**वीतक्लेशो व्यतरदमृतं देवतानां पुरस्तात् ॥ २० ॥**

**मार्कण्डेय इति ।**

निर्विकल्पे समाधौ त्वं कदाचिच्छ्राम्यसे यदि ।
कालशेषं क्षपयितुं सपर्यां कुरु शाङ्करीम् ॥ २० ॥

**ज्ञानं नेत्रं हरिरिव दिशन् कालचक्रं[3] जयी स्याः**
**क्षेमं लङ्केश्वर इव भज[4] प्राणवक्त्रोपहारैः ।**
**तातं[5] चण्डेश्वर इव महामोहमुन्मूल्य[6] सद्यः**
**सङ्कल्पं वा भिषगिव सुतं लप्स्यसे तत्पदं त्वम् ॥२१॥**

**ज्ञानमिति ।**

ज्ञानं[7]ज्ञेयादयो भावास्त्वयि निश्चिन्ततां गते ।
स्वयमेव विलीयेरन् ब्रह्म सम्पद्यते तदा ॥ २१ ॥

**अश्माघातैरुपचरितवान् यं पुरा कोऽपि भक्तो**
**गण्डूषाम्भःपृषतनिकरैरभ्यषिञ्चत् परो यम् ।**
**आनर्चान्यः शिरसि धनुषस्ताडनैः श्रेयसे यं**
**कामान् दास्यत्ययमभिमतांस्तेऽपि सोढापराधः ॥ २२॥**

**अश्माघातैरिति ।**

कृत्याकृत्यविकल्पेन न तुष्यति महेश्वरः ।
केवलं तोषयेदीशं भक्तिर्भावनिबन्धना ॥ २२ ॥

---

१. 'कं', २. 'योऽपिबत् का', ३. 'क्रान्', ४. 'जन्', ५. 'तश्चण्डे' क. पाठः. ६. 'लयन् यः' ख. पाठः. ७. 'नं' क. पाठः.

आराध्येशं विरचितनतिस्तस्य पादारविन्दे
तत्र श्रद्धामनितरगतिं[1] त्वत्प्रियां श्लाघमानः ।
लौल्यं त्यक्त्वा प्रियसख ! चिरासादितायाममुष्या-
मन्यासङ्गं परिहरसि चेत् खण्डिता नैव सा स्यात् ॥२३॥

आराध्येशमिति ।

श्रीपादपङ्कजे नित्यं श्रद्धामव्याहतां कुरु ।
बहिर्विषयलौल्येन न तां क्षणमपि त्यज ॥
वल्लभस्यान्यया सङ्गे परिज्ञाते कथञ्चन ।
ईर्ष्यापराङ्मुखी योषित् खण्डितेत्यभिधीयते ॥ २३ ॥

नून शम्भोश्चरणवसतिं ब्रह्मविद्यास्व[2]रूपां
भक्तिं ज्ञास्यस्यधिकविशदां शाश्वतज्ञानगर्भाम् ।
वाल्मीकीये जनकतनयां लक्ष्मणस्यानुजन्मा
पुण्यारण्ये लवणनिधनाभ्युद्यतो यद्वदग्रे ॥ २४ ॥

नूनमिति ।

भक्त्यैवोत्पद्यते शुद्धं स्वरूपज्ञानमैश्वरम् ।
ज्ञानादेव भवेन्मोक्षो न दानेन न चेज्यया ॥ २४ ॥

या सा वाचि प्रकृतिमधुरा या च [3]चित्ते दयालु-
र्या वा नम्रा वपुषि विनयाद् या च नेत्रे प्रसन्ना ।
सा(ध्यर्या? ध्व्या)स्तस्याः किमिह बहुभिर्वर्णनानां प्रकारैः
सैषा काचित् सरसिजभुवो मानसी सृष्टिरन्या ॥ २५ ॥

या सा वाचीति ।

निराकारतया वक्तुं लक्षणं नैव शक्यते ।
भक्तस्य लक्षणैरेव तस्माद् भक्तिश्च लक्ष्यते ॥
स्ववल्लभायाः सौभाग्यं सौशील्यादीन् गुणानपि ।
विप्रयुक्तः स्वमित्राय वदतीत्यपि बुध्यते ॥ २५ ॥

---

१. 'तिस्त्वत्प्रि', २. 'सवित्रीं भ' क. पाठः. ३. 'वि' ख. पाठः. ४. 'ध्यां' क. पाठः.

**कार्श्यं यायात् खलु[1] विधिवशात् प्रायशः साम्प्रतं सा**
**कालुष्यं वा मयि पुनरनाचारमाशङ्कमाना ।**
**शोचेत्[2] किं वा[3] प्रियसहचरी दुर्लभं मां विदित्वा**
**किं किं बालाः प्रियाविरहिता नैव सञ्चिन्तयन्ति ॥ २६ ॥**

**कार्श्यं यायादिति ।**

पुण्यपापप्रवृत्तश्चेत् पुमान् भक्तिः कृशा भवेत् ।
प्रविशेन्नास्तिकमतं यदि कालुष्यमाप्नुयात् ॥
साध्वी स्त्री विरहे पत्युः कार्श्यं यायाद्दिने दिने ।
सपत्नीसङ्गमाशङ्क्य कालुष्यं वा गमिष्यति ॥ २६ ॥

**पृच्छेद्वासौ चिरमुपनिषच्छारिकामन्तिकस्थां**
**पुंसः किन्नु स्मरसि रसिके! त्वं हि तत्प्रेमपात्रम् ।**
**आत्मश्लाघा वरमिति न मे सौम्य! जानीहि वाक्यं**
**साक्षात्कर्तुं प्रभवति भवान् क्षिप्रमेवामुमर्थम् ॥ २७ ॥**

**पृच्छेदिति ।**

श्रवणानन्दकारिण्या वाण्या[4] श्रवणतत्परान् ।
आह्लादयन्त्युपनिषच्छारिकेत्यभिधीयते ॥
सिद्धार्थबोधकं वाक्यं नार्थवादो नच स्तुतिः ।
यत्प्रामाण्यबलात् तत्त्वं साक्षात्कुर्वन्ति साधवः ॥
आत्मानं सुभगं मत्वा सखे! त्वां न प्रकोपये ।
त्वमेव ज्ञास्यसि क्षिप्रमित्याह[6] विरहातुरः ॥ २७ ॥

**कुर्यात् सा चेच्चरणकमले दीर्घखेदापनुत्त्यै**
**चर्यां शम्भोः प्रथमकथितस्यार्धनारीश्वरस्य ।**
**त्वं चावश्यं कुरु करुणया तत्र किञ्चिद् विलम्बं**
**पश्चाद् वाणीं कथय सदयं मन्मुखेनोच्यमानाम् ॥ २८ ॥**

**कुर्यादिति ।**

नहि भक्त्या विना भक्तः सपर्यायां प्रवर्तते ।
भक्तिः सपर्यां कुर्यादित्यस्माद्धेतोर्निगद्यते ॥ २८ ॥

---

१. 'ल', २. 'वा', ३. 'त्वा', ४. 'भक्त्या श्र' क. पाठः. ५. 'रा ।' ख. पाठः. ६. 'त्येष वि' क. पाठः.

साकं शान्त्या यदि किल भवेत् सेयमेकान्तशीला
तन्निश्शङ्कां सपदि सहजां सानुकम्पां समेत्य।
आर्ये! भर्तुस्तव सहचरश्चित्तसंज्ञोऽस्मि हंस-
स्तत्सन्देशादुपगत इहेत्येवमाचक्ष्व तस्यै ॥ २९ ॥

साकमिति।

यस्माद् भक्तिं बिभर्त्येष तस्माद् भक्तेति कथ्यते।
सम्यक् तत्त्वोपदेशोऽपि सन्देश इति बुध्यताम् ॥ २९ ॥

दूरे स्थित्वा स्वहृदयगतां संस्मरन् प्रेयसीं त्वां
भावानन्यान् नखलु पुरतो वर्तमानान् स वेत्ति।
तीर्थक्षेत्रेष्वयमनुदिनं त्वन्निविष्टान्तरात्मा
शोचत्यार्ये! शिव शिव शिवेत्युद्गृणंस्त्वद्गुरुं च ॥

*भूयो भूय इति।

कान्तया विप्रयुक्तत्वं क्वचिच्छोकस्य कारणम्।
अन्यत्र भवजक्लेशपरिश्रान्तिरहर्निशम् ॥ ३० ॥

इत्युक्ते त्वय्यथ शिवकथाजालिमालम्बमाना
ज्ञानाह्वानं सपदि नयनं साधु विष्फारयन्ती।
प्रेक्षेत त्वां नलपरिसरादागतं राजहंसं
वैदर्भीव प्रियवचनतो भूयसा ह्लादयन्तम् ॥ ३१ ॥

इत्युक्त इति।

भक्तिः शिवकथायुक्ता भूयो भूयो विवर्धते।
निःश्रेयसं तवापि स्यात् तयोरेव समाश्रयात् ॥ ३१ ॥

जाताभिज्ञा तदनु सहजं सौम्य! युक्तोपचारां
स्वात्मस्थाने पशुपतिपदे सादरं सन्निवेश्य।
आवेद्यास्मै भुवनपतये सा समाश्वासयेत् त्वा-
मानन्दाख्यैरमृतसलिलैरध्वखेदोपशान्त्यै ॥ ३२ ॥

---

१. 'यं' क. पाठः. २. 'पि', ३. 'संसारक्ले', ४. 'रं' ख. पाठः.

---

* 'भूयो भूयः स्वहृदय' इति व्याख्यासम्मतः पाठः स्यात्।

जाताभिज्ञेति ।

चिरकालप्रमुषितं देहाद्यभिनिवेशतः ।
स्वरूपप्रत्यभिज्ञानं शिवभक्त्यैव सम्भवेत् ॥ ३२ ॥

विश्रान्तः सन् वद मम मुखात् त्वत्समानाकृतिः सन्
पश्याम्यार्ये! प्रकृतिमधुरां भावलग्नामहं त्वाम् ।
सूक्ष्मः सूक्ष्मादधिकविशदां भूयसैवावदातः
शान्तः शान्तामनितरगतिं त्वामनन्याश्रयश्च ॥ ३३ ॥

विश्रान्तः सन्निति ।

यं यं भावयते भावं सकलं वार्थ निष्कलम् ।
तं तं भावमवाप्नोति भावनायाः प्रभावतः ॥ ३३ ॥

ब्रह्मा वाणीमिव निजमुखे लालयन् सानुरागं
पश्चाल्लक्ष्मीं हरिरिव हृदि श्लाघमानो निवेश्य ।
देहस्यार्धे शिव इव शिवां त्वामुपश्लोक्य पूर्वं
तांस्तान् भोगानभजमधुना सोऽस्मि दैवेन दूरे ॥ ३४ ॥

ब्रह्मेति ।

पूर्वमन्वभवं भोगान् भक्तिमाश्रित्य शाम्भवीम् ।
योगभ्रष्टो विधिवशात् संसरामि तया विना ॥ ३४ ॥

संविद्धातुद्रवमतितरां स्वच्छमासाद्य सद्यः
प्रज्ञासंज्ञामपि च फलकां तूलिकां ध्यानरूपाम् ।
शान्तां मूर्तिं तव विलिखितुं भावयास्म्येष यावत्
तावद् वैरी नयनयुगलं बाष्पपूरो निरुन्धे ॥ ३५ ॥

संविद्धातुद्रवमिति ।

निराकारतया भक्तिर्बाह्यदृष्ट्या न लक्ष्यते ।
ज्ञानदृष्टिमवष्टभ्य प्रज्ञयैवानुभूयते ॥ ३५ ॥

योगीन्द्रेषु श्रवणमननध्यानशीलेषु नित्यं
मौनस्थेषु व्रतिषु यतिषु ब्रह्मविद्वत्सु सत्सु ।

---

१. 'तु' ख. पाठः,

**भस्मच्छन्नेष्वपि च जटिलेष्वंशतस्त्वां विपश्यन्**
**पूर्णाकारां क्वचिदपि विधेर्वैभवान्नो लभे त्वाम् ॥ ३६ ॥**
**योगीन्द्रेष्विति ।**

भक्तेः सम्पूर्णताभावादप्राप्तज्ञानवैभवाः ।
मुक्तये यतमानाश्च पुण्यानां भुञ्जते फलम् ॥

तथाहि भगवद्गीता—

"मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥"

इति ॥ ३६ ॥

**एकान्ते त्वां प्रणयभरितो निर्विशन्नेकदा तु**
**प्राप्तुं शम्भुं सपदि निभृतो यः पुरा संस्मृतोऽस्मि ।**
**अस्मादार्ये ! कुशलिनमभिज्ञानतो मां विदित्वा**
**त्वं चावश्यं भव कुशलिनी तत्पदं सेवमाना ॥ ३७ ॥**
**एकान्त इति ।**

सकृत् प्रसक्तया भक्त्या विनष्टे सर्वकिल्बिषे ।
नाधः पतति पुण्यात्मा (ना ? प्रा)प्नोति सुकृतां गतिम् ॥

तथाहि भगवद्गीता—

"पार्थ ! नैवेह नामुत्र विनाशस्तस्य विद्यते ।
नहि कल्याणकृत् कश्चिद् दुर्गतिं तात ! गच्छति ॥"

इति ॥ ३७ ॥

**नष्टो मायामृग इव खरो दूषणश्चैव पाप्मा**
**व्यामोहाय प्रसरति परं वासना राक्षसी मे ।**
**संसाराख्ये ननु विगलति स्वप्नरूपेऽन्धकारे**
**बोधादित्येऽप्युदितवति सत्यावयोः स्याद्धि योगः ॥ ३८ ॥**
**नष्टो मायामृग इति ।**

प्रारब्धभोगपर्यन्तं भाति देहादिवासना ।
(भवेन्ना)र्थक्रियाकारिण्येषा स्याद् दग्धभस्मवत् ॥ ३८ ॥

---

१ः '+ + स्थानेष्व', २. 'यं' क. पाठः.

आश्लिष्य त्वामथ विवृणुयां स्नेहमानन्दसान्द्रं
कम्पैः स्वेदैरपि च पुलकैर्नेत्रयोर्मीलनेन ।
यत्संश्लेषे सति तु गुरुणा शङ्करेणाप्यभिन्नं
प्रेक्षिष्यन्ते ननु सुमनसो मां च साक्षान्महेशम् ॥ ३९ ॥

आश्लिष्येति ।

यदि भक्तिरविच्छिन्ना विप्रवृद्धा निरन्तरा ।
साक्षान्महेश एव स्यात् सर्वद्वैतविवर्जितः ॥ ३९ ॥

दूरस्थः सन् प्रणमति मम प्राणनाथोऽनुरक्तः
पादाम्भोजं स खलु युवयोः सख्युरस्यैव मूर्ध्ना ।
इत्थं पित्रोस्तव सदययोः सम्यगावेदयार्ये!
कुर्याः किञ्चित् त्वमपि नमनं तन्वि! ताभ्यां शिवाभ्याम् ॥

दूरस्थ इति ।

विषयाभिमुखी भक्तिर्विषयेष्वनुरञ्जयेत् ।
ईश्वराभिमुखी भक्तिरीश्वरत्वं प्रयच्छति ॥ ४० ॥

नैवायासं गमयतु भवान् धार्मिके बन्धुकृत्ये
नासीत् कश्चिद् भवदविषयः सर्वभावेषु सौम्य! ।
क्षिप्रं गन्तुं त्वमसि चतुरो वेत्सि सर्वं च तस्मा-
दार्तत्राणं कुरु करुणया तद्धि कृत्यं विभूनाम् ॥ ४१ ॥

नैवायासमिति ।

चित्तायत्ता शिवे भक्तिर्ज्ञानं भक्तिनिबन्धनम् ।
ज्ञानाधीनं च कैवल्यं तस्माच्चित्तं शिवेऽर्पयेत् ॥ ४१ ॥

सर्वं कर्तुं क्षम इति सखे! प्रारभे त्वां नियोक्तुं
कार्येऽन्यस्मिन् गुरुणि करुणां मय्यनाथे कुरुष्व ।
अन्तर्यागे मम पुनरिमामानय त्वं महात्मन्!
यद्वत् सीतां रघुपतिमखे सौम्य! वल्मीकजन्मा ॥ ४२ ॥

सर्वं कर्तुमिति ।

अन्तः प्रविष्टं जन्तूनां प्रत्यगात्मतया शिवम् ।
आराधयाम्यहं भक्त्या त्वं चेच्चित्तानुमोदसे ॥ ४२ ॥

---

१. 'पि', २. 'यं संश्ले' क. पाठः. ३. 'च नमस्तन्वि' ख. पाठः.

मात्रे नागान्तक इव सुधां स्वर्गलोकात् सपत्न्यै
युद्धे दिव्यौषधमिव मरुन्नन्दनो लक्ष्मणाय ।
शिष्यो दूरादिव च गुरवे दक्षिणां प्राप्तविद्यो
मह्यं भक्तिं सहजसुहृदे शाम्भवीमानय त्वम् ॥ ४३ ॥

मात्र इति ।

निश्शेषदुःखनाशश्च (दुःखापा)ये सुखोदयः ।
सुलभो भक्तियुक्तानामितरेषां सुदुर्लभः ॥ ४३ ॥

संसारार्तप्रियसखसमाश्वासहेतोः सखीभिः
साकं शान्त्यादिभिरिह समागच्छ मार्गं सुषुम्नाम् ।
इत्येवं त्वय्युदितवति सा सानुकम्पा तदा त्वा-
मन्वग्यायात् प्रणयभरिता गौरिवात्मीयवत्सम् ॥ ४४ ॥

संसारार्तेति ।

भक्तिमेवानुसन्धत्से यदि त्वं पारमेश्वरीम् ।
अनुग्रहीष्यति त्वासौ वात्सल्येनोपबृंहिता ॥ ४४ ॥

मूलं प्रायः प्रथमकथितं त्वय्युपावर्तमाने
पूर्वं नीता विगलदमृताकारिणी सौम्य! शक्तिः ।
स्थानाच्छम्भोः सगरतनयश्रेयसे गां पतन्ती
गङ्गा भागीरथमिव विशेदाशु मार्गं त्वदीयम् ॥ ४५ ॥

मूलमिति ।

स नारयोगः कथितः प्रागाग्नेयो विमुक्तिदः ।
सूच्यते सृष्टियोगोऽद्य सेव्योऽष्टैश्वर्यसिद्धिदः ॥ ४५ ॥

प्राप्ते मूले परिचर सखे! त्वं सुषुम्नावटस्य
प्राज्ञः पूर्वं मुनिरिव शुको दक्षिणां तत्र मूर्तिम् ।
सम्यग्ज्ञानं तव वितनुयाच्छाम्भवं शाश्वतं या
यत्रोत्पन्ना विलसति परा वैखरी वाग्विभूतिः ॥ ४६ ॥

---

१. 'त्र', २. 'सौम्य ज्ञा' क. पाठः.

प्राप्ते मूल इति ।

एनां सरस्वतीं देवीं पूर्वोक्तां भजसे यदि ।
ज्ञानं त्रिकालविषयं वाक्सिद्धिमपि विन्दसे ॥ ४६ ॥

मूले लिङ्गं महितभुजगीमौलिरत्नायमानं
संसर्पन्त्या शिशिरसुधया द्वादशान्तेन्दुशाङ्कात् ।
भक्त्या युक्तस्तव सहजया भूयसैवाभिषिञ्चं-
स्तत्तोयेन प्रियसख! तनुं स्नावयित्वा सुखी स्याः ॥ ४७ ॥

मूले लिङ्गमिति ।

एतेनामृतयोगेन षडूर्मिक्लेशवर्जिताः ।
प्राचीना मुनयोऽद्यापि जीवन्ति निरुपद्रवाः ॥ ४७ ॥

धारावर्षे निपतति शिरोमण्डलादुल्बणं ते
हार्दे कुञ्जे किल निवसतां लालितानां त्वयैव ।
आत्मस्थाने प्रियसख! गवां सुप्रचाराय तूर्णं
मोहं गोवर्धनमिव हठादुद्धरन्नच्युतः स्याः ॥ ४८ ॥

धारावर्ष इति ।

गोष्ठीं पशूनां विश्रान्तिस्थानं व्रजकुलौकसाम् ।
सर्वेन्द्रियाणां विश्रान्तिं मूलाधारं विदुर्बुधाः ॥ ४८ ॥

साहाय्यं चेन्मम हि तनुयाः साम्प्रतं त्वं कृपालो!
संसाराख्ये सपदि जलधौ ज्ञानसेतुं निबध्य ।
कामं हत्वा बहुमुखमथ प्रेयसीं तामवाप्स्ये
यद्वत् पूर्वं रघुकुलपतिर्मैथिलीं मान्यशीलाम् ॥ ४९ ॥

साहाय्यमिति ।

कामो बहुमुखः प्रोक्तो गृहक्षेत्रादिगोचरः ।
लङ्केश्वरोऽपि दशभिर्मुखैर्युक्तश्च रावणः ॥ ४९ ॥

न त्यक्ष्यामि क्षणमपि चिरात् संश्रितां तां तु साध्वीं
तस्यां सक्तः सुचिरमनघं स्वाधिराज्यं प्रपत्स्ये ।

---

१. 'णेऽस्मिन् ह्रा' क. पाठः.

श्रद्धां मेधां श्रुतिमपि धृतिं शान्तिदान्ती च मुक्तिं
कृष्णो गोपीजनमिव भजन् निर्वृतस्त्वं च भूयाः ॥५०॥

न त्यक्ष्यामीति ।

स्वर्गादिराज्यं स्वाराज्यं मनुते नहि पण्डितः ।
तदेव तस्य स्वाराज्यं यत्तु साम्राज्यमात्मनः ॥ ५० ॥

आत्मज्ञानामृतमभिमतं जन्मतापोपशान्त्यै
पायं पायं सपदि विसृजन् कृत्यशेषानशेषान् ।
[2]सञ्छिद्याहं मम तदिदमित्यादिसंसारपाशान्
स्वैरं लोके विहर सुचिरं कर्मलेपै[3]रलिप्तः ॥ ५१ ॥

आत्मज्ञानामृतमिति ।

विस्तरेण पुरा प्रोक्तं [4]वेदान्तार्थमशेषतः ।
सुखेन प्रतिपत्त्यर्थं संक्षिप्योपादिशत् कविः ॥ ५१ ॥

इति हंससन्देशे सव्याख्ये उत्तरसन्देशः
समाप्तः ॥

---

शुभं भूयात् ।

---

१. 'भा', २. 'सङ्कल्पाद्यैः कलुषगरलैर्दुष्टसर्पैरदष्टः स्वैरालो', ३. 'शै' ख. पाठः. ४. 'यद्वेदान्तार्थशे' क. पाठः.

UNIVERS...
4 SEP. 1931

# श्लोकानुक्रमणिका ।


| श्लोकः | पार्श्वम् |
|---|---|
| अन्यत् कार्यं प्रिय | १३ |
| अश्माघातैरुपचरितवान् | ३० |
| आत्मज्ञानामृतमभि | ३९ |
| आदौ तत्त्वं तदनु भुवनं | ७ |
| आदौ तावच्छृणु | ६ |
| आपृच्छस्व प्रकृति | ९ |
| आराध्येशं नियम | ११ |
| आराध्येशं विरचित | ३१ |
| आलम्ब्यास्मिन्नधिक | २० |
| आश्लिष्य त्वामथ | ३६ |
| इत्युक्ते त्वय्यथ | ३३ |
| ईशानं तत्पुरुष | २९ |
| उद्दीप्याग्निं सपदि | १३ |
| ऊर्ध्वं नाभिं करण | १८ |
| एकान्ते त्वां प्रणय | ३५ |
| औदासीन्यं नहि | ५ |
| कश्चिन्मायामृगवशगतः | १ |
| कार्श्यं यायात् खलु | ३२ |
| कालीं कालाम्बुदनिभ | १८ |
| कुर्यात् सा चेच्चरण | ३२ |
| कैलासाख्यं तदुपरि | २३ |
| क्षिप्त्वा सद्यः कलुष | १७ |
| क्षेत्रे तस्मिन् सह | २ |
| गन्तव्यं ते गिरिश | ६ |
| चन्द्रादित्याद्यविदित | २७ |
| जन्मग्रीष्मश्रममुषि | ४ |
| जाताभिज्ञा तदनु | ३३ |
| ज्ञानं नेत्रं हरिरिव | ३० |
| तत्त्वान्यादौ त्रिभुवन | २६ |
| तस्माद् गच्छेर्मणि | १७ |
| तस्मिंश्चान्द्रं विलसति | २७ |
| तस्मिन् संवित्सरसि | ,, |
| त्वय्येवैष स्फुरति | १९ |
| दिव्या शक्तिः परम | १२ |
| दीपाकारं द्युतिदलित | ११ |
| दूरस्थः सन् प्रणमति | ३६ |
| दूरे स्थित्वा स्वहृदय | ३३ |
| दृष्टे तस्मिंश्चिरविरहितां | ४ |
| देवेष्वेकस्त्रिषु वितनुते | ५ |
| देवैः सिद्धैर्मुनिभिरभितः | २९ |
| दशां जालन्धरमथ | २२ |
| देशे तस्मिन् सकल | २४ |
| द्रक्ष्यस्यन्तःपुरमपि | २८ |
| धारावर्षै निपतति | ३८ |
| न त्यक्ष्यामि क्षणमपि | ,, |
| नष्टो मायामृग इव | ३५ |
| नानारूपान् निजसमुदितान् | २० |
| निस्त्रैगुण्ये निखिल | २५ |
| नूनं तस्मिन् हृदय | २० |
| नूनं शम्भोश्चरणवसतिं | ३१ |
| नैवायासं गमयतु भवान् | ३६ |
| पाण्डोः पुत्रा हरिमिव | १० |
| पूर्वं सौम्यां प्रविश | ११ |
| पृच्छेद्वासौ चिरमुपनिषद् | ३२ |
| प्राप्ते मूले परिचर | ३७ |
| प्राप्यं तस्मादुपरि | १८ |
| प्रासादेऽस्मिन् भज | २८ |
| प्रेक्षिष्यन्ते सुकृतसुरभिम् | १२ |
| बद्ध्वा मूलं दृढमतितराम् | १४ |
| ब्रह्माण्डं तद्गतमपि | २५ |

| श्लोकः. | पार्श्वम्. | श्लोकः. | पार्श्वम्. |
|---|---|---|---|
| ब्रह्मा वाणीमिव | ३४ | विश्वस्रष्टा विधिरपि | २५ |
| भूरिक्लेशे विषयविपिने | ५ | शास्त्रं बौद्धं तुलयति | ८ |
| मन्युं बुद्ध्या स्वधिति | २० | शोचिष्केशः शिशिर | २६ |
| मात्रे नागान्तक इव | ३७ | सत्ता यस्य स्थिरपरि | २८ |
| मार्कण्डेयो मुनिरिव | ३० | सत्यं ज्ञानं सकल- | २७ |
| मार्गा बुद्धक्षपणककणादा- | ७ | सन्ध्यामेघप्रतिभट - | १७ |
| मार्गे सम्यक् प्रवितत | १५ | सम्पूर्णेन्दुद्युतिसह | १४ |
| मूलं प्रायः प्रथमकथितम् | ३७ | सर्वं कर्तुं क्षम इति | ३६ |
| मूले लिङ्गं महितभुज | ३८ | साकं शान्त्या यदि | ३३ |
| मेरुं पश्चात्प्रविश | १६ | सान्द्रानन्दामृतजलनिधौ | २९ |
| मेरोरस्य त्वयि सति | ,, | साहाय्यं चेन्मम हि | ३८ |
| मोहे लाक्षागृह इव | १५ | सिद्धिप्राप्त्यै बिलमिव | १६ |
| मौलौ कुन्दोल्लसितम् | २९ | सेतुः सोऽयं भवजल | ८ |
| यत्रावुद्धे स्फुरति | २५ | सैषा गारी सरस | १२ |
| यद्येकं वा प्रविशसि | १५ | सौषुम्णोऽत्रा सकल | ७ |
| यस्मिन् दृष्टे त्रिभुवन | २६ | सौषुम्नस्य प्रकृतिगहनम् | १३ |
| या सा तस्मिन् निवसति | २८ | संविद्धातुद्रवरुतितरां | ३४ |
| या सा वाचि प्रकृति- | ३१ | संसारार्तिप्रियसख | ३७ |
| योगीन्द्रेषु श्रवणमनन- | ३४ | स्थाने तस्मिन् हृदय | १९ |
| वायुः सेवां तव शिव | १० | स्थित्वा तस्मिन् प्रियसख ! | २३ |
| विश्रान्तः सन् वद मम | ३४ | | |

# स्मृतग्रन्थाद्यनुक्रमणी ।

| पृष्ठम् | वाक्यानि | ग्रन्थनाम | कर्तृनाम |
|---|---|---|---|
| ७ | ... | ... | बुद्धः |
| ,, | ... | ... | क्षपणकः |
| ,, | ... | ... | कणादः |
| ,, | ... | ... | अक्षपादः |
| ,, | ... | ... | बौद्धाः |
| ८ | ... | बुद्धशास्त्रम् | ... |
| ,, | ... | ... | सौत्रान्तिकः |
| ,, | ... | ... | वैभाषिकः |
| ,, | ... | ... | योगाचारः |
| ,, | ... | ... | माध्यमिकः |
| ९ | ... | ... | सौगताः |
| ११ | मध्यमेऽपि हृदयेऽपि | ... | महर्षयः |
| १२ | मूले लिङ्गे च नाभौ | .... | ... |
| १४ | अग्निर्ज्योतिरहःशुक्लः | भगवद्गीता | ... |
| ,, | धूमो रात्रिस्तथा कृष्णः | ,, | ... |
| ३५ | मनुष्याणां सहस्रेषु | ,, | ... |
| ,, | पार्थ! नैवेह नामुत्र | ,, | ... |

# LIST OF SANSKRIT PUBLICATIONS FOR SALE.

| | | RS. | AS. | P. |
|---|---|---|---|---|
| भक्तिमञ्जरी **Bhaktimanjari** (Stuti) by H. H. Svāti Śrī Rāma Varma Mahārāja. | | 1 | 0 | 0 |
| स्यानन्दूरपुरवर्णनप्रबन्धः **Syanandurapuravarnana-prabandha** (Kāvya) by H. H. Svāti Śrī Rāma Varma Mahārāja, with the commentary Sundarī of Rājarāja Varma Koil Tampuran. | | 2 | 0 | 0 |

---

## Trivandrum Sanskrit Series.

| | | RS. | AS. | P. |
|---|---|---|---|---|
| No. 1 | —दैवम् **Daiva** (Vyākaraṇa) by Deva with Puruṣakāra of Kṛṣṇalīlāśukamuni (*out of stock*). | 1 | 0 | 0 |
| No. 2 | —अभिनवकौस्तुभमाला-दक्षिणामूर्त्तिस्तवौ **Abhinavakaustubhamala and Daksinamurtistava** by Kṛṣṇalīlāśukamuni (*out of stock*). | 0 | 2 | 0 |
| No. 3 | —नलाभ्युदयः **Nalabhyudaya** (Kāvya) by Vāmana Bhaṭṭa Bāṇa (*second edition*). | 0 | 4 | 0 |
| No. 4 | —शिवलीलार्णवः **Sivalilarnava** (Kāvya) by Nīlakaṇṭha Dīkṣita (*out of stock*). | 2 | 0 | 0 |
| No. 5 | —व्यक्तिविवेकः **Vyaktiviveka** (Alaṅkāra) by Mahima-Bhaṭṭa with commentary (*out of stock*). | 2 | 12 | 0 |
| No. 6 | —दुर्घटवृत्तिः **Durghatavrtti** (Vyākaraṇa) by Śaraṇadeva (*out of stock*). | 2 | 0 | 0 |
| No. 7 | —ब्रह्मतत्त्वप्रकाशिका **Brahmatattvaprakasika** (Vedānta) by Sadāśivendrasarasvatī (*out of stock*). | 2 | 4 | 0 |
| No. 8 | —प्रद्युम्नाभ्युदयम् **Pradyumnabhyudaya** (Nāṭaka) by Ravi Varma Bhūpa (*out of stock*). | 1 | 0 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 9—विरूपाक्षपञ्चाशिका **Virupaksapancasika** (Vedānta) by Virūpākṣanātha with the commentary of Vidyācakravartin (*out of stock*). | 0 | 8 | 0 |
| No. 10—मातङ्गलीला **Matangalila** (Gajalakṣaṇa) by Nīlakaṇṭha (*out of stock*). | 0 | 8 | 0 |
| No. 11—तपतीसंवरणम् **Tapatisamvarana** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*). | 2 | 4 | 0 |
| No. 12—परमार्थसारम् **Paramarthasara** (Vedānta) by Ādiśeṣa with the commentary of Rāghavānanda (*out of stock*). | 0 | 8 | 0 |
| No. 13—सुभद्राधनञ्जयम् **Subhadradhananjaya** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*). | 2 | 0 | 0 |
| No. 14—नीतिसारः **Nitisara** (Nīti) by Kāmandaka, with the commentary of Śankarārya (*out of stock*). | 3 | 8 | 0 |
| No. 15—स्वप्नवासवदत्तम् **Svapnavasavadatta** (Nāṭaka) by Bhāsa (*second edition*). | 1 | 8 | 0 |
| No. 16—प्रतिज्ञायौगन्धरायणम् **Pratijnayaugandharayana** (Nāṭaka) by Bhāsa (*out of stock*). | 1 | 8 | 0 |
| No. 17—पञ्चरात्रम् **Pancharatra** (Nāṭaka) by Bhāsa (*out of stock*). | 1 | 0 | 0 |
| No. 18—नारायणीयम् **Narayaniya** (Stuti) by Nārāyaṇa Bhaṭṭa with the commentary of Deśamangalavārya (*out of stock*). | 4 | 0 | 0 |
| No. 19—मानमेयोदयः **Manameyodaya** (Mīmāmsā) by Nārāyaṇa Bhaṭṭa and Nārāyaṇa Paṇḍita (*out of stock*). | 1 | 4 | 0 |
| No. 20—अविमारकम् **Avimaraka** (Nāṭaka) by Bhāsa (*out of stock*). | 1 | 8 | 0 |
| No. 21—बालचरितम् **Balacarita** (Nāṭaka) by Bhāsa (*out of stock*). | 1 | 0 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारो-रुभङ्गानि **Madhyamavyayoga-Dutavakya-Dutaghatotkaca-Karnabhara and Urubhanga** (Nāṭaka) by Bhāsa (*out of stock*). | 1 | 8 | 0 |
| No. 23—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part I, 1st and 2nd Kāṇḍas). (*out of stock*). | 1 | 12 | 0 |
| No. 24—जानकीपरिणयः **Janakiparinaya** (Kāvya) by Cakra Kavi (*out of stock*). | 1 | 0 | 0 |
| No. 25—काणादसिद्धान्तचन्द्रिका **Kanadasiddhantacandrika** (Nyāya) by Gaṅgādharasūri (*out of stock*). | 0 | 12 | 0 |
| No. 26—अभिषेकनाटकम् **Abhisekanataka** by Bhāsa (*out of stock*). | 0 | 12 | 0 |
| No. 27—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part I, 1st and 2nd Sargas) (*out of stock*). | 1 | 12 | 0 |
| No. 28—वैखानसधर्मप्रश्नः **Vaikhanasadharmaprasna** (Dharmasūtra) by Vikhanas (*out of stock*). | 0 | 8 | 0 |
| No. 29—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part II, 3rd Kāṇḍa) (*out of stock*). | 2 | 4 | 0 |
| No. 30—वास्तुविद्या **Vastuvidya** (Śilpa) (*out of stock*). | 0 | 12 | 0 |
| No. 31—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part III, 4th, 5th and 6th Kāṇḍas). | 1 | 0 | 0 |
| No. 32—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part II, 3rd, 4th and 5th Sargas) (*out of stock*). | 2 | 8 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 33—वाररुचसंग्रहः **Vararucasangraha** (Vyākaraṇa) with the commentary Dīpaprabhā of Nārāyaṇa (*out of stock*). | 0 | 8 | 0 |
| No. 34—मणिदर्पणः **Manidarpana** (Nyāya) by Rājacūḍāmaṇimakhin. | 1 | 4 | 0 |
| No. 35—मणिसारः **Manisara** (Nyāya) by Gopīnātha. | 1 | 8 | 0 |
| No. 36—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāsikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part III, 6th, 7th and 8th Sargas). | 3 | 0 | 0 |
| No. 37—आशौचाष्टकम् **Asaucastaka** (Smṛti) by Vararuci with commentary. | 0 | 4 | 0 |
| No. 38—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part I, 1st Kāṇḍa). | 2 | 0 | 0 |
| No. 39—चारुदत्तम् **Carudatta** (Nāṭaka) by Bhāsa (*out of stock*). | 0 | 12 | 0 |
| No. 40—अलङ्कारसूत्रम् **Alankarasutra** by Rājānaka Ruyyaka with the Alaṅkārasarvasva of Mankhuka and its commentary by Samudrabandha (*second edition*). | 2 | 8 | 0 |
| No. 41—अध्यात्मपटलम् **Adhyatmapatala** (Vedānta) by Āpastamba with Vivaraṇa of Śrī Sankara-Bhagavat-Pāda (*out of stock*). | 0 | 4 | 0 |
| No. 42—प्रतिमानाटकम् **Pratimanataka** by Bhāsa (*out of stock*). | 1 | 8 | 0 |
| No. 43—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghaṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part II, 2nd Kanda, 1-6 vargas). | 2 | 8 | 0 |
| No. 44—तन्त्रशुद्धम् **Tantrasuddha** by Bhaṭṭāraka Vedottama. | 0 | 4 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 45—प्रपञ्चहृदयम् **Prapancahrdaya.** | 1 | 0 | 0 |
| No. 46—परिभाषावृत्तिः **Paribhasavrtti** (Vyākaraṇa) by Nīlakaṇṭha Dīkṣita. | 0 | 8 | 0 |
| No. 47—सिद्धान्तसिद्धाञ्जनम् **Sidhantasiddhanjana** (Vedānta) by Kṛṣṇānanda Sarasvatī (Part I.) | 1 | 12 | 0 |
| No. 48—सिद्धान्तसिद्धाञ्जनम् **Do.** Do. (Part II). | 2 | 0 | 0 |
| No. 49—गोलदीपिका **Goladipika** (Jyotiṣa) by Parameśvara. | 0 | 4 | 0 |
| No. 50—रसार्णवसुधाकरः **Rasarnavasudhakara** (Alaṅkâra) by Singa Bhūpāla. | 3 | 0 | 0 |
| No. 51—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part III, 2nd Kanda, 7-10 vargas). | 2 | 0 | 0 |
| No. 52—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghaṭîya Sarvânanda (Part IV, 3rd Kâṇḍa). | 1 | 8 | 0 |
| No. 53—शाब्दनिर्णयः **Sabdanirnaya** (Vedânta) by Prakâśâtmayatîndra. | 0 | 12 | 0 |
| No. 54—स्फोटसिद्धिन्यायविचारः **Sphotasiddhinyayavichara** (Vyâkaraṇa). | 0 | 4 | 0 |
| No. 55—मत्तविलासप्रहसनम् **Mattavilasaprahasana** (Nâṭaka) by Mahendravikramavarman. | 0 | 8 | 0 |
| No. 56—मनुष्यालयचन्द्रिका **Manusyalayacandrika** (Śilpa) (*out of stock*). | 0 | 8 | 0 |
| No. 57—रघुवीरचरितम् **Raghuviracarita** (Kâvya). | 1 | 4 | 0 |
| No. 58—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣnânanda Sarasvatî (Part III). | 2 | 0 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 59—नागानन्दम् **Nagananda** (Nâṭaka) by Harṣadeva with the commentary Vimarśinî of Śivarâma (*out of stock*). | 3 | 4 | 0 |
| No. 60—लघुस्तुतिः **Laghustuti** by Laghubhaṭṭâraka with the commentary of Râghavânanda. | 0 | 8 | 0 |
| No. 61—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣnânanda Sarasvatī (Part IV). | 1 | 4 | 0 |
| No. 62—सर्वमतसंग्रहः **Sarvamatasangraha.** | 0 | 8 | 0 |
| No. 63—किरातार्जुनीयम् **Kiratarjuniya** (Kâvya) by Bhāravi with the commentary Sabdârthadîpikā of Citrabhânu (1, 2 and 3 Sargas). | 2 | 8 | 0 |
| No. 64—मेघसन्देशः **Meghasandesa** by Kâlidāsa with the commentary Pradīpa of Dakṣiṇâvartanātha. | 0 | 12 | 0 |
| No. 65—मयमतम् **Mayamata** (Śilpa) by Mayamuni (*out of stock*). | 3 | 4 | 0 |
| No. 66—महार्थमञ्जरी **Maharthamanjari** (Darśana) with the commentary Parimala of Maheśvarânanda. | 2 | 4 | 0 |
| No 67—तन्त्रसमुच्चयः **Tantrasamuccaya** (Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śankara (Part I, 1–6 Paṭalās) (*out of stock*). | 3 | 4 | 0 |
| No. 68—तत्त्वप्रकाशः **Tattvaprakasa** (Āgama) by Śrī Bhojadeva with the commentary Tâtparyadîpikâ of Śrī Kumāra. | 1 | 12 | 0 |
| No. 69—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Īśânaśivagurudevamiśra (Part I, Sâmânyapâda). | 1 | 8 | 0 |
| No. 70—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimulakalpa** (Part I). | 2 | 8 | 0 |
| No. 71—तन्त्रसमुच्चयः **Tantrasamuccaya**(Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara(Part II, 7—12 Paṭalās) (*out of stock*). | 3 | 8 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 72—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part II, Mantrapāda). | 4 | 0 | 0 |
| No. 73—ईश्वरप्रतिपत्तिप्रकाशः **Isvarapratipattiprakasa** (Vedānta) by Madhusūdanasarasvatī. | 0 | 4 | 0 |
| No. 74—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bâlakrîḍâ of Viśvarûpâcârya. (Part I — Âcâra and Vyavahâra Adhyâyās). | 3 | 4 | 0 |
| No. 75—शिल्परत्नम् **Silparatna** (Śilpa) by Śrīkumâra (Part I). | 2 | 12 | 0 |
| No. 76—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimulakalpa** (Part II). | 3 | 0 | 0 |
| No. 77—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Iśānaśivagurudevamiśra (Part III, Kriyāpāda 1—30 Paṭalās). | 3 | 0 | 0 |
| No. 78—आश्वलायनगृह्यसूत्रम् **Asvalayanagrhyasutra** with the commentary Anāvilā of Haradattācārya. | 2 | 6 | 0 |
| No. 79—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part I—1 & 2 Adhikaraṇās). | 3 | 12 | 0 |
| No. 80—अर्थशास्त्रम् **Do.** Do. (Part II—3—7 Adhikaraṇās). | 4 | 0 | 0 |
| No. 81—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bâlakrīḍa of Viśvarūpācārya (Part II. Prâyaścittâdhyâya). | 2 | 0 | 0 |
| No. 82—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part III, 8—15 Adhikaraṇās). | 3 | 4 | 0 |
| No. 83—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part IV, Kriyāpāda 31-64 Paṭalās and Yogapāda). | 3 | 8 | 0 |

MUL
064318

| | RS. | AS. | P. |
|---|---|---|---|
| No 84—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimulakalpa** (Part III). | 2 | 0 | 0 |
| No. 85—विष्णुसंहिता **Visnusamhita** (Tantra) | 2 | 8 | 0 |
| No. 86—भरतचरितम् **Bharatacarita** (Kâvya). by Kṛṣṇakavi. | 1 | 8 | 0 |
| No. 87—सङ्गीतसमयसारः **Sangitasamayasara** (Sangīta) of Sangītâkara Pârśvadeva. | 1 | 2 | 0 |
| No. 88—काव्यप्रकाशः **Kavyaprakasa** (Alaṅkâra) of Mammaṭabhaṭṭa with the two commentaries the Sampradāyaprakāśinī of Śrī Vidyācakravartin and the Sâhityacûdâmaṇi of Bhaṭṭagopâla (Part I, 1-5 Ullâsās). | 3 | 0 | 0 |
| No. 89—स्फोटसिद्धिः **Sphotasiddhi** (Vyākaraṇa) by Bharatamiśra. | 0 | 8 | 0 |
| No. 90—मीमांसाश्लोकवार्त्तिकम् **Mimamsaslokavartika** with the commentary Kāśikā of Sucaritamiśra (Part I). | 2 | 8 | 0 |
| No. 91—होराशास्त्रम् **Horasastra** of Varāhamihirācārya with the Vivaraṇa of Rudra. | 3 | 0 | 0 |
| No. 92—रसोपनिषत् **Rasopanisat.** | 2 | 0 | 0 |
| No. 93—वेदान्तपरिभाषा **Vedantaparibhasa** (Vedānta) of Dharmarājādhvarīndra with the commentary Prakāśika of Peddādīkṣita. | 1 | 8 | 0 |
| No. 94—बृहद्देशी **Brihaddesi** (Sangīta) of Matangamuni. | 1 | 8 | 0 |
| No. 95—रणदीपिका **Ranadipika** (Jyotiṣa) of Kumāragaṇaka. | 0 | 4 | 0 |
| No. 96—ऋक्संहिता **Rksamhita** with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya (Part I, 1st Adhyāya in 1st Aṣṭaka). | 1 | 8 | 0 |

RS. AS. P.

No. 97—नारदीयमनुसंहिता **Naradiyamanusamhita** (Smṛti) with Bhāṣya of Bhavasvāmin. 2 0 0

No. 98—शिल्परत्नम् **Silparatna** (Śilpa) by Śrīkumāra. 2 8 0

No. 99—मीमांसाश्लोकवार्त्तिकम् **Mimamsasloka-vartika** (Mīmāmsa) with the commentary Kāśikā of Sucaritamiśra (Part II). 2 0 0

No. 100—काव्यप्रकाश: **Kavyaprakasa** (Alaṅkāra) of Mammaṭabhaṭṭa with the two commentaries, Sampradāyaprakāsinī of Śrīvidyācakravartin and Sāhitya-cūḍāmaṇi of Bhaṭṭagopāla. (Part II, 6—10 Ullāsās). 5 0 0

No. 101—आर्यभटीयम् **Aryabhatīya** (Jyotiṣa) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan (Part I. Gaṇitapāda). 2 8 0

No. 102--दत्तिलम् **Dattila** (Saṅgīta) of Dattilamuni. 0 4 0

No. 103—हंससन्देशः **Hamsasandesa** (Vedānta) with commentary. 0 8 0

*Apply to:—*

*The Curator*

*for the publication of Sanskrit Manuscripts,*

*Trivandrum.*

A3

A49 Mb

30 SEP 1941